

भक्तिविषयकाः सिद्धान्ताः



लेखकः
डॉ. सुरेशकुमार टी. व्यासः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्-गुजरातम्
Shree Somnath Sanskrit University-Veraval-Gujarat
2013

।। भक्तिविषयकाः सिद्धान्ताः ।।

प्रधानसम्पादकः

प्रो. वेम्पटि कुटुम्बशास्त्री

लेखकः

डॉ. सुरेशकुमार टी. व्यासः

प्रकाशनम्

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

जूनागढजनपदम्, गुजरातम् - ३६२ २६६.

दूरभाषः - ०२८७६ - २४४५२८, २९, ३२ फेक्स : २४४४१७

e-mail : sssu.veraval@gmail.com,

www.shreesomnathsanskrituniversity.info

प्रकाशकः -

डॉ. दशरथः जादवः

कुलसचिवः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

युनिवर्सिटी रोड, वेरावलम् - ३६२ २६५

जुनागढजनपदम् (गुजरात)

प्रथमं संस्करणम्

फरवरी, २०१३

प्रतयः

३००

ISBN

978-93-83097-10-4

मूल्यम्

रु. १००/-

मुद्रकः

एच. के ओफसेट, वेरावलम्

॥ शुभाशंसनम् ॥

संस्कृतं नाम दैवी वाक् अन्वाख्याता महर्षिभिः इत्यनयोक्त्या संस्कृतमनुपमं वर्तते। अस्य संस्कृतस्य साहित्यं विश्वस्मिन् सर्वतोमुखेन राराजते। एतत् संस्कृतज्ञानं विना जीवः शिवः न भवति। अतः संस्कृतं सर्वथा संसेव्यं समुपासनीयञ्च। एतस्य संस्कृतस्य समुपासकाः पूर्वमपि बहवः कवयः ग्रन्थकाराश्च बभूवुः। साम्प्रतमपि अनेके लेखकाः कवयश्च वर्तन्ते। तेषां लेखनेनैव महान्छात्रोपकारः भवतीति विदितमेव। परम् एतत् ग्रन्थप्रकाशनं न भवति चेत् तज्ज्ञानमपि प्रकाशितं न भवति।

श्री सोमनाथसंस्कृतविश्वविद्यालयः एकत्र संस्कृतभाषायाः प्रचारप्रसारक्षेत्रे दत्तावधानो दत्तकालश्च वर्तते। अन्यत्र च नूतनसाहित्यसर्जनां कारयितुं ताञ्च प्रकाशयितुमपि कृतसंकल्पोस्ति। अस्मिन्नेव पुण्ये संदर्भे '**उज्जयिनीनगरे**' समायोजिते '**संस्कृतसाहित्योत्सवे**' श्रीसोमनाथसंस्कृतविश्वविद्यालयः बहूनां ग्रन्थानां प्रकाशनं करोति। तत्र अध्यापकानां छात्राणाञ्च कृते **डो. सुरेशकुमार टी. व्यास**रचितः '**भक्तिविषयकाः सिद्धान्ताः**' नामधेयः ग्रन्थोऽयं महल्लाभाय भविष्यतीति आशाषे। ग्रन्थोऽयं सर्वोपकारकः सर्वत्र प्रसरितः भवेदीति सुभासंशनं व्यनज्मि।

॥ जयतु सोमनाथः जयतु संस्कृतम् ॥

प्रो. वी. कुटुम्बशास्त्री
कुलपतिः
श्री सोमनाथसंस्कृतविश्वविद्यालयः
वेरावलम्

हृदयाञ्जलिः

श्रीहरिरेव अस्य ग्रन्थस्य मूलहेतुभूतः वर्तते भक्तिसाध्यत्वात् । सा च भक्तिः अत्र प्रतिपाद्यत्वेन प्रमुखा । तेन मया प्रप्रथमं स एव हृदा मुदा प्रार्थ्यते ।न्

हरिर्हरतु हार्दिकं हरणयोग्यमेवाखिलं
समस्तसुखसागरो सुखयतु स्वनाम्ना हृदि ।
चराचरचरप्रभो चरतु चञ्चले चेतसि
सुरेशशरणाश्रिते वितरतात्सुभक्तिं सदा ॥ १ ॥

सर्वार्थसम्भवो देहः जनितः पोषितो यतः तादृशौ पितरौ श्रीरामचन्द्रभक्तिपरायणौ भक्तिरूपौ च भ्राता तथैव भगिन्यः सपरिवाराः सर्वभावैः प्रणम्यन्ते ।

तातः त्र्यम्बकलालभक्तिभरितः माता प्रभा भायुता
भ्राता भारतभारतीपतिमतो मान्यः महेशो महान् ।
गीता मे विजया तथा सुनयना तिस्त्रो भगिन्यस्सदा
सर्वेषां सकलाशिषा गतिमितः भक्तेः प्रबन्धो महान् ॥ २ ॥

मम जीवनस्य आधारभूताः, स्वपुत्रवन्मयि स्नेहभाजः, वेद–न्याय–वेदान्त–व्याकरण–साहित्यादिषु बृहस्पतिरिव राराजमानाः, गुर्जररत्नभूताः, ज्ञानिनामग्रगण्याः गुरुवर्याः श्री नरेन्द्राचार्याः प्रबन्धरचनायां सततं पथदर्शकाः दिग्दर्शकाश्चाभवन् । मया ते सादरं सहार्दभावं प्रणम्यन्ते ।

साहित्यशब्दनयशास्त्रविदो वरेण्याः
वेदान्तवेदहरिभक्तिमतां शरण्याः ।
श्रीकृष्णशंकरसुशिष्यवराः वदान्याः
आचार्यसद्गुरुनरेन्द्रबुधाः जयन्ति ॥ ३ ॥

साहित्यशास्त्राम्बुधिगूढत त्त्वं
यत्सन्निकर्षेण मयाध्यगायि ।
पण्ड्येत्युपाह्वं गुजरातरत्नं
गुरुं नरेन्द्रार्यवरं नमामि ॥ ४ ॥

ये योग-न्यायादि शास्त्रनिपुणाः, जगद्गुरु श्रीरामानन्दाचार्य-पदारूढाः, तपोनिष्ठाः तपस्विनः मम जीवने न्याय-व्याकरणादि बीजान्युप्तवन्तः तानपि अत्र प्रणौमि।

यः श्रीजगद्गुरुवरो बुभुजे शतायुः
टाटाम्बरी हरिरतोऽखिलयोगसिद्धः।
न्यायादिशास्त्रविबुधो बुधमानदाता
रामप्रपन्नशरणं तमहं प्रपद्ये ॥ ५॥

श्रीमद्भागवतविद्यापीठसंस्थापकाः शुकस्वरूपाः विद्वत्तल्लजाः संस्कृतसंरक्षकाः धीमन्तः श्रीकृष्णशङ्करशास्त्रिणोऽपि सादरं संस्मर्यन्ते स्तूयन्ते च।

श्रीकृष्णशंकरशुकं किल कण्वकल्पं
विद्यानिधिं द्विजवरं परमार्द्रभावम्।
श्रीवल्लभांघ्रिशरणं यमुनार्पितान्तं
सद्धामसर्जकमहं प्रणमामि भक्त्या ॥ ६ ॥

संस्कृतासक्तजीवाः महाकवयः संस्कृतविस्तारकाः शिष्यप्रियाः पूज्याः श्रीरामदासगुरवोऽप्यत्र सहार्दभावं सभाज्यन्ते।

यत्संस्कृतं सरलमाधुरताप्रपूर्णं
यज्जीवनं सुरगिरः प्रचराय पूर्णम्।
यज्ज्ञानमद्य मम जीवनसारपूर्णं
नौमीह तं कविवरं गुरुरामदासम् ॥ ७ ॥

संस्कृतसंस्कृतिसंरक्षकाः विद्वत्प्रियाः साधुगुणगणमण्डिताः सद्गुरवः देवर्षिपदमण्डिताः शास्त्री श्रीमाधवप्रियदासजी स्वामिनः तथैव वात्सल्यमूर्तयः पुराणिनः सद्गुरवः श्रीबालकृष्ण दासजी स्वामिनः मया सानुनयं सविनयं वाग्भिः समर्च्यन्ते।

श्रीबालकृष्णविबुधप्रिय-सद्गुरुं मे
श्रीधर्मजीवनपथाश्रयणं नमामि।
संस्थापकं गुरुवरं किल दर्शनस्य
श्रीमाधवं मम धवं प्रणमामि नित्यम् ॥ ८ ॥

सदा यज्ञपरंपरानुरक्ताः यज्ञपरंपरारक्षकाः यज्ञज्ञानदायकाः वशिष्ठकल्पाः गुरूप्रवराः श्रीफूलशङ्करशास्त्रिणः मया संस्तूयन्ते।

यो भारतीयगहनं सरलं विधाय
तत्त्वं जनेषु वितरत्यखिलं सुभोग्यम् ।
ग्रथ्नाति ग्रन्थनिचयान् तमहं महर्षिं
श्रीफूलशंकरगुरुं शरणं प्रपद्ये ॥ ९ ॥

प्रसङ्गेऽस्मिन् सहधर्मचारिणीं प्रियां पुत्रीं पुत्रं च सर्वतोभावेन सभाजयन् मोदमावहति मे मनः।

मीना कलत्रमिह मे निखिले सहाया
पुत्री ममापि नियतिः नियतिस्सुधन्या ।
देवांशदिव्यदयितश्च सुतो सुहासी
एते प्रबन्धरचने मम हेतुभूताः ॥ १० ॥

लेखनकार्यसमाप्ते सङ्गणकबद्धकरणे केचन शिष्याः सखायश्च सहायका अभवन्। तेऽप्यत्र सभाज्यन्ते।

शिष्यः महेशतनयः मिलनोऽस्ति ज्येष्ठः
सभ्रातृजोऽत्र मम संगणके सहायः ।
गोविन्दमित्रसरलो रमणीयकार्ये
ताभ्यामहं हि प्रददे किल साधुवादान् ॥ ११ ॥

विषयानुक्रमः

भक्तिविषयकाः सिद्धान्ताः

१

श्रीशङ्कराचार्याणां मते भक्तिसिद्धान्तः

प्रायः जनानां शेमुषीजुषामयमभिप्रायः यद् अद्वैतवादप्रतिष्ठापकत्वाचार्याः केवलं ज्ञानवादिनः सन्तीति। अद्वैतवादोऽयं ज्ञानदर्शनचरमलक्ष्यपरिचायकः। परं पूर्णालोकनेन इदं विज्ञायते यदाचार्याः ज्ञानकर्मभक्तिसमुच्चयवादिनः दृश्यन्ते।

यस्य जीवने कर्मणि भक्तिविलासः दृश्यते स एव भक्तपदवाच्यः भवति। शङ्करः आधारः भक्तिराधेया। भक्तशङ्करे विचारिते एव शङ्कराचार्यभक्तिसंपर्कः निर्णेष्यते। स चायं विचारः जीवन–साधना–रचनाभेदात् त्रेधा विभज्यते।

जीवनम्

श्रीशङ्कराचार्याः परमपितृमातृभक्ताः। पितुर्दिवङ्गते मर्माहता इति नाविदितं पण्डितप्रवराणाम्। तद्मातृभक्तिदर्शिकाः नैकाः कथाश्च श्रुतिपटलं मातृप्रेमनिर्भरं विदधति। ते मातृपितरावेव परमगुरु इत्यमन्यन्त। अत एव ते मातुराज्ञां समादायैव संन्यदीक्षामङ्गीचक्रुः। इतोऽप्यधिकं तु संन्यासिनां स्वगृहप्रत्यावर्तनं शास्त्रनिषिद्धमपि मातुरनुरोधेन वर्षैकवारं गृहमागत्य तस्याश्च मृत्युसमये और्ध्वदैहिकां क्रियां कृत्वा उत्तमोत्तममातृभक्तस्यादर्शं दर्शयामासुः। तथैव गुरुभक्तिरपि परमश्रेष्ठास्त्याचार्याणां

तच्चाद्वैतानुभूतिपद्येन ज्ञायते –

यस्य प्रसादादहमेव विष्णुः मय्येव सर्वं परिकल्पितञ्च ।
इत्थं विजानामि सदाऽऽत्मरूपं तस्याङ्घ्रियुग्मं प्रणतोऽस्मि नित्यम् ॥

भक्तिः

आचार्यचरणाः ज्ञानवैराग्याभ्यां सह भक्तिमपि मुक्तिसाधनं प्रतिपादयामासुः यथा –

वैराग्यमात्मबोधो भक्तिश्चेति त्रयं गदितम् ।

अन्यत्र च मनोनिरोधोपायरूपेण श्रीहरिचरणयोः भक्तियोगः कथितः यथा–

हरिचरणयोगान्मनः स्ववेगं जहाति शनैः ।

(प्रबोधसुधाकरद्विधाभक्तिप्रकरणम् – १६६–१६७)

आचार्याणां भक्तिजयगाथागाने मणिरत्नमालायाः अन्यतमं रत्नं भक्तिरेव । आत्मजिज्ञासाव्याजेनाचार्याः उपदेशावसरे स्वानुभूतं सत्यं प्रकटीचक्रुः यथा –

अहर्निशं किं परिचिन्तनीयं संसारमिथ्यात्वशिवात्मतत्त्वम् ।
किं कर्म यत् प्रीतिकरं मुरारेः क्वास्थान कार्या सततं भवाब्धौ ॥

किं कर्म ? येन श्रीकृष्णः प्रसीदति तत् तस्य श्रीकृष्णस्य प्रसादेन सालोक्य–सामीप्य–सायुज्यप्राप्तिश्च भवति । उक्तञ्च –

फलमपि भगवद्भक्तेः किं तल्लोकस्वरूपसाक्षात्त्वम् ।

– (प्रश्नोत्तरमालिका ६७)

श्रीशङ्कराचार्याः भक्तिप्रयोजनफले निरुप्य न तृप्ता अतः भक्तेः श्रेष्ठत्वस्थापनाय प्रोचुः यथा –

मोक्षकारणसामग्र्यां भक्तिरेव गरीयसी ।
स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते ॥

– (विवेकचूडामणिः ३१)

अत्र मुक्ति हेतुभूतेषु भक्तेरेव गरीयस्त्वं व्यज्यते । आचार्यचरणानां जीवने, आचरणे सर्वत्र भक्तिप्रभावः पूर्णरूपेण दृश्यते । भक्तिः आत्मतत्त्वविकासिका–परिपूरिका वेति सर्वत्र तैः प्रत्यपादि । विनाभावपरिप्लुतिं न कश्चिद् भावमयीं रचनां कर्तुं समर्थो भवति अत्र तत्र सर्वत्राचार्याणां रचनासु भावाधिक्यं भक्तिमहत्वं च दृश्येते । यथा –

भगवद्गीता किञ्चिदधीता गङ्गाजललवकणिका पीता ।

सकृदपि यस्य मुरारिसमर्चा तस्य यमः किं कुरुते चर्चाम् ॥
भज गोविन्दं भज गोविन्दं गोविन्दं भज मूढमते ।

अत्र भक्तिशब्दस्य मूलं **भज सेवायाम्** धातोरेव प्रयोगः विहितः । अत आचार्याः यदा यां कां देवतां स्तुवन्ति तदा तद्भक्ताः भान्ति यथा श्रीकृष्णभक्ताः शङ्कराचार्याः –

विना यस्य ध्यानं व्रजति पशुतां सूकरमुखां
विना यस्य ज्ञानं जनिमृतिभयं याति जनता ।
विना यस्य स्मृत्या कृमिशतजनिं याति स विभुः
शरण्यो लोकेशः मम भवतु कृष्णोऽक्षिविषयः ॥

अत्र हि भक्तेः उत्तमकोटिता दृश्यते ।

अन्ते च विद्यामिच्छेत् महेश्वरात् इति नयेन शिवः ज्ञानस्य मूर्तिः परं भक्तेरपि मूर्तस्वरूपं शिव एव वर्तते । शिवकल्पः न रामभक्तोऽन्यः च रामचन्द्रापेक्षया नोत्तमः शिवभक्तः । अतः श्रीशिवावतारः श्रीशङ्करः यदि भक्तिवादी तर्हि नैतच्चित्रम् ।

२
श्रीरामानुजाचार्याणां भक्तिः

तत्रभवतो भगवतः श्रीरामानुजाचार्याणां सिद्धान्तः विशिष्टाद्वैतः प्रोच्यते।

श्रीरामानुजाचार्याः अभेदप्रतिपादिकाः श्रुतयः भेदप्रतिपादकाश्च श्रुतयः निर्गुणब्रह्मप्रतिपादिकाः सगुणब्रह्मप्रतिपादिकाश्च उभयविधाः श्रुतयः प्रमाणभूताः सत्याश्चेति मन्वते। तेषां मते तत्र अभेदप्रतिपादकश्रुतिवाक्येषु त्रयः ब्रह्म-प्रकृति-जीवाः वर्ण्यन्ते च भेदप्रतिपादकश्रुतिषु ते त्रयः पृथग् वर्ण्यन्ते। तथैव यत्र निर्गुणाख्यानं तत्र न ब्रह्मणि प्राकृतगैुकोऽपि एवमेव सगुणाख्याने ब्रह्मणि स्वरूपभूतेऽलौकिकः गुणः यः न जडप्रकृतौ जीवात्मनि वेति ज्ञेयम्।

आचार्यप्रवराणां मते ब्रह्म स्थूल-सूक्ष्म-चेतना-विशिष्टे हि पुरुषोत्तमोऽस्ति, यः सगुणः सविशेषश्च वर्तते। तस्य ब्रह्मणः शक्तिर्हि माया वर्तते। ब्रह्माशेषकल्याणकरगुणगणाकरभूतं तस्मान्न किमपि निकृष्टं तत्र सम्भवति। तल्लक्षणञ्च सर्वेश्वरत्व-सर्वशेषित्वसर्वकर्माराध्यत्व-सर्वफलप्रदत्व-सर्वाधारत्व-सर्वकार्योत्पादकत्व-समस्तद्रव्यशरीरत्व-चिदचित्-शरीरादिकं वर्तते। तच्च सूक्ष्म-चिद्रचिद्-विशेषरूपे जगत उपादानकारणं संकल्प-विशिष्टरूपे च निमित्तकारणं एवं तदेव अभिन्न-निमित्तोपादनकारणं वर्तते। जीवजगती तच्छरीरं भगवांश्च तदात्मा। स च सृष्टिकर्ता कर्मफलदः, नियन्ता, सर्वान्तर्यामी, असीमौदार्यकारुण्यसौशील्य-वात्सल्य-ऐश्वर्य-सौन्दर्याद्यनन्त-सद्गुणसागरः सर्वाधीश्वरः भगवान् श्रीनारायण एव वर्तते। तच्छ्ररूपञ्च पञ्चधा व्यभाजि यथा - पर-व्यूह-विभव-अन्तर्यामी-अर्चाभेदात्। सः शङ्ख-चक्र-गदा-पद्मधारी चतुर्भुजः लीलासहितः समस्तदिव्याभूषणभूषितः वर्तते।

तन्मते जगज्जडं ब्रह्मशरीरञ्च। ब्रह्म जगद्रूपेण परिणमति तथापि निर्विकारमयतिष्ठते। जगच्छत्यं न मिथ्या। जीवोऽपि ब्रह्मशरीरं तस्माद् ब्रह्मजीवावुभावपि चेतनौ। ब्रह्म विभू, जीवोऽणुः, ब्रह्म पूर्णं, जीवोऽपूर्णः, ब्रह्मेश्वरः, जीवो दासः, ईश्वरः कारणं, जीवश्च कार्यम् अस्ति। स चायं जीवः

देहेन्द्रियमनोप्राणादिभ्यः भिन्नः । जीवः नित्यः तस्मात्तच्छस्वरूपमपि नित्यम् । प्रत्येकस्मिन् शरीरे जीवः भिन्नः भिन्नः भवति । उपाधिवशादेव जीवः संसारभोगमवाप्नोति । स एव कर्ता-भोक्ता वर्तते । तस्य च पञ्चभेदा अदर्शिषताचार्यवरैः यथा नित्य-मुक्त-केवल-मुमुक्षुबद्धाः ।

आचार्याः मुक्तिं व्याचिख्यासवः प्रोचुः **दिव्यधामश्रीवैकुण्ठे सश्रीभूलीलानारायणसेवाप्राप्तिर्हि परमपुरुषार्थः** । भगवता इयं दासत्वप्राप्तिर्हि मुक्तिः । न भगवता सह अभिन्नता कदापि सम्भवेत् यतो हि जीवः स्वरूपतः नित्यः, नित्यदासः, नित्याणुश्च वर्तते । न कदापि विभुत्वमवाप्तुं क्षमते । सः वैकुण्ठे असीमकल्याण-गुणगण-महोदधिभगवन्नारायणस्य नित्यं दासत्वं प्राप्यैव मुक्तः जीवः दिव्यानन्दानुभवं प्राप्तुं शक्नोति ।

अस्याः मुक्तेर्पञ्चोपायाः दर्शिताः - कर्मयोगः, ज्ञानयोगः, भक्तियोगः, प्रपत्तियोगः, आचार्याभिमानयोगश्च । पञ्चैतेऽपि भक्तेरङ्गानि सन्ति । न केवलं ज्ञानेन मुक्तिसम्भवः। ब्रह्मात्मैक्यज्ञानेन सर्वथा अविद्यानिवृत्तिः नैव भवितुमर्हति । भक्त्या प्रसन्न एव भगवान् दयामयः मुक्तिं प्रददानि अतः वेद-ध्यान-उपासनादिभिः शब्दैः भक्तिरेव सूच्यते नान्यत् ।

आचार्याणां श्रीरामानुजानां सम्मतमते न्यासविद्या हि प्रपत्तिः । आनुकूल्यस्य संकल्पः, प्रतिकूलतायाः त्यागः, भगवति पूर्णरूपेणात्मसमर्पणं, सर्वभावेन भगवच्छरणं हि प्रपत्तिः कथ्यते ।

अन्ते च मतसारः यथा - **विभु-भूमभगवच्छरणयोरात्मसमर्पणेनैव मुक्तिः प्राप्यते** । अतः सर्वस्वनिवेदनस्वरूपा शरणागतिभक्तिर्हि भगवत्प्रसन्नतायाः परमं चरमञ्च साधनमिति श्रीरामानुजाचार्यमतडिण्डिमः वर्तते ।

३
श्रीनिम्बार्काचार्यमता भक्तिः

श्रीनिम्बार्काचार्याः साधकेभ्यः मोक्षप्राप्ति हेतवे ब्रह्मसाधनामादिदिशुः कथयामासुश्च अमूर्तमूलोपासनापेक्षया प्रकाशितमूर्तरूपोपासना वरीयसी साधकेभ्य इति । एतस्मादेव तदनुयायिन : सत्त्वगुणाधिपं भगवन्तं श्रीकृष्णमेव मुख्योपासत्वेनाङ्गिचक्रुः । अपि च तदाश्रिताः श्रीकृष्णराधिकायुगलमूर्तेः विशेषरूपेणोपासनां विदधति । अतः पूर्वमाचार्याः ब्रह्मावाप्तये भक्तियोगान्तर्गतेभ्यः भक्तेभ्यः यद्साधनम् आश्रयणीयत्वेन दर्शयामासुः । तस्य परिचयः लिख्यते ।

तन्मते ब्रह्म चिदानन्दस्वरूपम् अद्वैतं सत्पदार्थमस्ति । तत्स्वरूञ्चाचार्याः चतुष्पादविशिष्टम् इति रूपेण वर्णयामासुः यथा –

(क) दृश्यस्थानीयमनन्तं जगत् प्रथमपादरूपेण वर्तते ।

(ख) अस्य जगतौ पदार्थानां भिन्न भिन्नरूपेण दृष्टाजीवः द्वितीयपादरूपेणास्ति ।

(ग) अनन्तजागतिकपदार्थानां पूर्णरूपेण नित्यद्रष्टेश्वरः तृतीयपादरूपेण विराजते ।

(घ) पूर्वोक्तत्रिरूपविवर्जितः नित्य एकरस आनन्दमात्रानुभवकर्ता यस्य श्रुतिभिः एकान्ताक्षरपादनाम्ना व्यवहारः कृतः सः चतुर्थपादरूपेण राराजते ।

अत्र स्वभाष्ये श्रीनिम्बार्कस्वामिनः द्वैताद्वैतमीमांसायाः भेदाभेदवादस्य स्थापनां चक्रुः । भेदाभेदसिद्धान्ते दृश्यं जगच्च जीवः उभावपि मूलतः ब्रह्मैव परं न जीवजगन्मात्रायामेव न तत्सत्तासमाप्तिः । उभयोः पारेऽपि तच्छ्रूपं वर्तते । तदेव हि जगतो मूलं उपादानकारणं वर्तते । जगज्जीवौ तु ब्रह्मणोंऽशभूतौ । अंशेन साकं अंशिनः यः भेदाभेदः संबंधः तथैव जगज्जीवाभ्यां सार्धमपि ब्रह्मसंबंधोऽस्ति । अंशः संपूर्णावयवे अंशिनोऽङ्गम् । अत एव अभिन्नश्चांशी अंशमतिक्रम्यापि स्थितः नांशमात्रे अंशिसत्तासमाप्तिः । अतः अंशी अंशाद् भिन्नोऽपि वर्तते । एतस्मादेवोभयोः संबंधः भेदाभेदनाम्ना निर्दिश्यते ।

आचार्यसम्मतमते सर्वरूपमरूपं, सर्वरूपमयं सर्वरूपानीतञ्च, प्राकृतगुणातीतं सर्वजगन्नियन्तृ ब्रह्म भक्त्यैव प्राप्यते । भक्तिरेकैव पूर्णब्रह्मप्राप्तिसाधनभूता । स्वं

जगच्च ब्रह्मरूपेण चिन्तनमेव भक्तेः मुख्यमङ्गमस्ति । भक्तिमार्गानुगामीसाधकाय अनात्मनामा नास्ति कोऽपि पदार्थः । भक्तिमार्गोपासनायाः सगुणोपासनारूपेणैव व्याख्या न समीचीना आचार्यनिम्बार्कमते भक्तिमार्गोपासना त्रिविधाङ्गेषु पूर्णतामवाप्नोति । भक्तदृष्ट्या ब्रह्म सगुणं निर्गुणञ्च । भक्तः यां कामपि मूर्तिं पश्यति तामेव ब्रह्म ज्ञात्वा तस्यां प्रेम्णा स्निह्यति । एवं सर्वविधद्वैतविवर्जिते असूयारहिते चेतसि जाते साधकस्य ब्रह्मणि सम्यक् निष्ठोदेति । इयमेव शास्त्रेषु पराभक्तिपदेन प्रोच्यते । अनयैव पराभक्त्या परब्रह्मसाक्षात्काराः संभवति । भक्तेर्प्राथमिकावस्था साधनभक्तिः कथ्यते । अनया साधनभक्त्यैव चित्तं प्रसरितं भूत्वानन्तामवाप्नोति । तदा पराभक्तिनाम्नी भक्तेः चरमावस्था साध्यते ।

एतन्मते च श्रीश्रीभगवद्विग्रहस्य ब्रह्मरूपेणोपासना द्वैतबुद्धौ प्रतिष्ठिता । साक्षात् संबंधेन मोक्षप्रदा न तथापि चित्तं निर्मलं विद्यायाल्पसमये अल्पायासेन अद्वैतज्ञानं जनयति । अनेन ज्ञानेन पराभक्तिः स्वयमेवोदेति । अनया च ब्रह्मसाक्षात्कारं विधाय साधकः मोक्षपदं लभते ।

भगवदवतारान्तं सर्वापि मूर्तयो जनसाधारणस्योपास्याः भवन्ति । य खलु विष्णुं सर्वव्याप्तं ध्यातुमक्षमाः भेदबुध्या च सर्वत्र समदर्शनेऽक्षमाः तेभ्यः भगवद्विग्रहपूजनं हि सर्वोत्कृष्टं भक्तिमार्गस्य साधनं वर्तते । ये साधकाः प्रेमपूर्वकं तद्विग्रहस्य ध्यान-मन्त्र-कीर्तन-जप-स्मरणं विदधन्ति ते तद्सारुप्यं लभन्ते । अयमेव भक्तिमार्गस्य सहजः स्वभावः । भक्त्या साधकवशीभूतः भगवान् भक्तस्य सर्वमनोरथांश्च पूरयति । एवञ्च प्रतिमायां ब्रह्म साधयतः भक्तस्य प्रतिमायामेव ब्रह्मत्वप्रकटीकरणञ्जायते ।

आचार्यप्रवराः स्वग्रन्थे वेदान्तकामधेनौ तल्लब्ध्युपायं प्रदर्शयामासुः यथा -

कृपास्य दैन्यादियुजि प्रजायते यथा भवेत् प्रेमविशेषलक्षणा ।
भक्तिर्ह्यनन्याधिपतेर्महात्मनः सा चोत्तमा साधनरूपिका परा ॥

अत्रायं भावः भगवान् श्रीकृष्णः दैन्यादिगुणगणयुक्ते पुरुषे कृपाकटाक्षं विदधाति । अनेनैव कृपाकटाक्षेण परमात्मनि प्रेमविशेषरूपा भक्तिरुत्पद्यते । इयं हि द्विविधा - साधनरूपा अपरा भक्तिः अन्या उत्तमा पराभक्तिश्च ।

श्रीनिम्बार्कसम्प्रदायसारडिण्डिमश्च जीवः सर्वत्र सर्वजीवेषु भगवद्बुद्धिं संस्थाप्य द्वेष-हिंसा-मिथ्याभाषण-कलहादीन् त्यक्त्वा, अहंकाररहितबुध्या निर्मलचेतसा च प्रेमपूर्णहृदयेन श्रीभगवद्स्वरूपसागरे नदीव प्रविश्य अच्युतानन्दप्राप्ति योग्यो भवति -इदमेव श्रीनिम्बार्काचार्येण प्रचारितस्य सनातनस्य भक्तिमार्गस्य लक्ष्यमिति दिक् ।

सर्वसंतापहारिणो सर्वानर्थनिवृत्तिकारिणः श्रीहरेः जयोऽस्तु ।

४

श्रीमन्मध्वाचार्याणां मते भक्तिः

श्रीमदाचार्याः स्वसिद्धान्तसारे प्रतिपादयन्ति यत् —

मुक्तिर्नैजसुखानुभूतिरमला भक्तिश्च तत्साधनम् ।

अनेन सिध्यति यत् श्रीमध्वमते मोक्षसाधनं भक्तिरेव विद्यते नान्यत् । अपि च श्रीमध्वाचार्याः भक्तिं लक्षयन्तः जगदुः

यथा –

माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः ।
स्नेहो भक्तिरिति प्रोक्तः तया मुक्तिर्न चान्यथा ॥

अत्र आचार्याः बभणुः यदाराध्यदेवस्य महिमानं ज्ञात्वा स्त्री-सुतादिपरिवारापेक्षया भगवति दृढतरः स्नेहः भक्तिपरवाच्य इति । अनया भक्त्यैव जीवः सांसारिकदुःखं तीर्त्वा मुक्तिभाक् भवति नान्यथा ।

श्रीमदाचार्याः यत्र तत्र स्वग्रन्थेषु बहुशः भक्तिमेव मुक्तिसाधनरूपेण प्रतिपादयामासुः यथा गीताभाष्ये —

यथा भक्तिविशेषोऽत्र दृश्यते पुरुषोत्तमे ।
तथा मुक्तिविशेषोऽपि ज्ञानिनां लिङ्गभेदने ॥
योगिनां भिन्नलिङ्गानामाविर्भूतस्वरूपिणाम् ।
प्राप्तानां परमानन्दं तारतम्यं सदैव हि ॥

अत्र तेषामाशयः यत् भगवति श्रीहरौ यावती प्रवृद्धा गाढा भक्तिः भवति तावदेव प्रमाणेन लिङ्गदेहभङ्गेन ज्ञानिनां मोक्षविशेषस्य अधिकाधिकानन्दस्य अनुभवः संजायते । तत्रैव गीताभाष्ये ज्ञानपूर्विकां भक्तिं चर्चयन्त आहुः –

विना ज्ञानं कुतो भक्तिः कुतो भक्तिं विना च तत् ।

– (गीताभाष्यम्)

अनेन फलितं भवति यत् ज्ञानपूर्विका भक्तिः मोक्षाय कल्प्यते ।

श्रीमध्वाचार्याः ब्रह्मसूत्रानुव्याख्याने मोक्षप्राप्तौ भक्तिर्हि कारणमिति ऊचुः यथा –

अतो विष्णोः पराभक्तिः तद्भक्तेषु रमादिषु ।
तारतम्येन कर्तव्या पुरुषार्थमभीप्सता ॥

मोक्षप्राप्तौ भक्तिर्हि हेतुरतः भगवतो विष्णोः भक्तिकरणमेव मुख्यं कर्तव्यमिति फलति।

आचार्याः भगवत्तत्त्वनिर्णये भक्त्यैव श्रीहरिः प्रत्यक्षीभवतीति जगदुः यथा–

भक्त्या प्रसन्नो भगवान् दद्याज्ज्ञानमनाकुलम् ।
तथैव दर्शनं यातः प्रदद्यान्मुक्तिमेतया ॥

गीतातात्पर्येऽपि भक्तिमेव मुख्यां मोक्षसरणिं मेनिरे यथा –

भक्त्यर्थान्यखिलान्येव भक्तिर्मोक्षाय केवलम् ।
मुक्तानामपि भक्तिर्हि नित्यानन्दस्वरूपिणी ॥

अत्र सर्वाण्यपि कर्माणि भक्ति प्राप्तय एव भवन्तीरि परं मोक्षसाधनत्वेन भक्तिरेकैव संभवति। मोक्षवतामपि भक्तिरेकैवानन्ददायिनी जायते।

श्रीकृष्णामृतमहार्णवे ते वेदवचनमपि भक्त्यै वर्तत इति कथयामासुः यथा–

ज्ञानपूर्वः परस्नेहो नित्यो भक्तिरितीर्यते ।

इत्यादिवेदवचनं साधनप्रविधायकम्॥

श्रीमदाचार्याः गीतातात्पर्ये परोक्षापरोक्षज्ञानप्राप्तये च ज्ञानिनां मोक्षप्राप्तयेऽपि भक्तिरेव परमं चरमञ्च साधनमिति उद्घोषयामासुः ।

श्रीमद्भागवते नवधा भक्तिः प्रतिपादिता। तां लक्ष्यीकृत्य श्रीकृष्णमृतमहार्णवे हरिमहिमावबोधके ग्रन्थे चर्चयामासुः यथा –

अर्चितः संस्मृतो ध्यातः कीर्तितः कथितः स्मृतः ।
यो ददात्यमृतं हि च स मां रक्षतु केशव ।

एवं हि वेदोपनिषत्पुराणादिभिः प्रतिपादिता भक्तिः श्रीमदाचार्यमते इत्थं वर्तते।

१. परिवाराधिकनित्यसर्वोत्तमश्रीहरौ स्नेहः भक्तिः ।

– सा च तन्महिम्नः ज्ञानेन पूर्णा दृढा च जायते। एतादृशैव भक्तिः मोक्षाय कल्पते।

– ज्ञानेनैवामृतीभवति – ज्ञानेन मोक्षप्राप्तिः भवति । तच्च ज्ञानं भक्तिमिश्रितमपेक्षितम्। ज्ञानरहिता भक्तिः भक्तिरहितं च ज्ञानं न मोक्षसाधकम्।

२. तारतम्यक्रमेण पूर्वं भगवति ततश्च तदर्धङ्गिन्यां लक्ष्मीदेव्यां प्रजापतौ वाय्यवादिदेवतायां च यथायोग्यं भक्तिः कर्तव्या।

– ततश्च स्वगुरौ ज्ञानवयोवृद्धेषु च आदरसहिता भक्तिः कर्तव्या।

– वसुधैव कुटुम्बकमिति भावनया सर्वेऽपि जीवाः भगवद्कुटुम्बिनः इति भावस्थापनं विधेयम्।

इदं स्वाभिमतं मतं श्रीआचार्याः द्वादशस्तोत्रे लिलिखुः यथा –

कुरु भुङ्क्ष्व च कर्म नियतं हरिपादविनम्रधिया सततम्।
हरिरेव परो हरिरेव गुरुः हरिरेव जगत्पितृमातृगतिः॥ –१/१

तस्मिन्नेव स्तोत्रेऽन्यत्र भगवतोऽनन्यभावेन शरणं कामयमाना ईडिरे यथा–

अगणितगुणगणशरीर हे विगतगुणेतर भव मम शरणम्॥ १/३

हे प्रभो भवद्विग्रहोऽनन्तगुणगणरचितः न तत्र दोषांशोऽपि अतः मां रक्षस्व।

इत्थं श्रीमध्वाचार्याः स्वराद्धान्ते सर्वत्र भक्तिगुणगाथां प्रशंसयामासुरिति दिक्।

५

श्रीवल्लभाचार्याणां पुष्टिभक्तिः

श्रीवल्लभसंप्रदाये भक्तिः द्विधा ।

१. मर्यादाभक्तिः

२. पुष्टिभक्तिश्च ।

एतयोर्द्वयोरपि वैलक्षण्यमेवाङ्गिकृतम् । भगवच्चरणारविन्दभक्तिरेव मर्यादाभक्तिः । भगवतो मुखारविन्दभक्तिस्तु पुष्टिभक्तिः । मर्यादाभक्तिः फलं कामयते, पुष्टिभक्तिस्तु फलं नेतराकामाङ्क्षते । मर्यादाभक्तिद्वारा सायुज्यमेवकेवलम्, परं पुष्टिभक्तिद्वारा ब्रह्मणः अभेदावबोधः । अतः दुःखक्लेशादि संवलिताज्जगत उद्धाराय यदि कश्चित् श्रेयस्तरो मार्गस्तर्हि स पुष्टिमार्ग एवेति तेषां दृढीयान् विश्वासः । स एव मुमुक्षुभिः सर्वात्मना उपादेयत्वेनोररीकर्तव्यः ।

पुष्टिभावैकभाविताः पुष्टिभक्त्या भक्तान् पोषणमादधानाः श्रीवल्लभाचार्यमहाप्रभवः श्रीमद्भागवते सुबोधिनीं टीकां चक्रुस्ते तत्र रासपञ्चाध्याय्यारम्भे बोधयामासुः यथा - भगवान् लीलापुरुषः श्रीकृष्णः गोपीरूपदिशति यत् पतिपुत्र सेवा हि स्त्रीणां परो धर्मः तदा गोप्योऽवोचन् –

अस्त्येवमेतदुपदेशपदे त्वयीशे
प्रेष्ठो भवांस्तनुभृतां किल बन्धुरात्मा ॥

(१०/२९/३२)

अत्रायं भावः भवान् श्रीकृष्ण एव तनुभृतां जीवानां प्रियतमः, बन्धुः आत्मा च वर्तते । अत भवदुपदेशोऽयं तदाश्रयभूतं भवन्तमुद्दिश्यैवास्ति । तस्मात् प्रभुसेवैव देहधारिणां समेषामपि परोधर्मः स्वधर्मश्च । पतिपुत्रसेवा तु देहसंबंधकारणेनैव भवति, नात्मधर्म-भगवद्धर्मसंबंधकारणेन । एतस्मादेव ये जीविनः देहेन्द्रियभोगं न वांछन्ति त एव भगवति चिदानन्दे स्निह्यन्ति । यतो हि समष्टिरूपे भगवते यत्कर्माराध्यते तत्कर्म भगवानेव सर्वात्मरूपः तस्मात् यष्टिरूपजीवायापि भवत्येव अत्र चोदाहरणम् –

यथा तरोमूलनिषेचनेन तृप्यन्ति तत्स्कन्धभुजोपशाखः ।

भगवान् प्रेष्ठः अत एव सर्वधर्माणां भगवति सिद्धिः तस्मादपि धर्मिरूपे भगवानेवाराध्यः । यः प्रियः कालातीतश्च स एव सेवनीयः । स च प्रियः कालातीतश्च केवलं श्रीकृष्ण एक एव वरीवर्ति च सर्वदोषवर्जितोऽपि स एक एव –

कृष्णात्परं नास्ति दैवं वस्तुतो दोषवर्जितम् ।

अतः श्रीकृष्णसेवनं हि भक्तिशास्त्रसंदोहः, तस्मादेव श्रीमहाप्रभवः पुष्टिमार्गं स्थापयामासुः । पुष्टिभक्तौ दृढीयान् स्नेह एव प्रधानः –

यदा यस्यानुगृह्णाति भगवानात्मभावितः ।
स जहाति मतिं लोके वेदे च परिनिष्ठिताम् ॥

यदा भगवान् श्रीकृष्णः आत्मभावेन यं कृपाभाजनं विदधाति तदा सः पुरुषः लोकवेदविष्ठितां शेमुर्षी त्यजति । अनेन सिद्धं भवति यत् वेदप्रतिपादितायाः मयादाभक्तेः पुष्टिभक्तिर्भिन्ना । केवलं भजनमेव न भक्तिः अपि तु यत्र प्रियत्वं हि प्रयोजनं सा भक्तिः वर्तते । भक्तिशब्दे क्तिन् प्रत्ययः प्रियसूचको विराजते । केवलेन हि भावेन गोप्यो गावः खगाः मृगाः ।

इत्यादौ श्रीमद्भागवते प्रयुक्तः भावशब्दार्थः भक्तिरेव वर्तते । भावशब्दार्थश्च देवादिविषयिणी रतिरेव । रतिशब्दस्य धर्मः स्नेहः भवति एतस्मादेव –

सा परानुरक्तिरीश्वरे ।

इत्यादिभक्तिसूत्रेषु शाण्डिल्यादिमुनिभिः प्रभौ चिदानन्दे निरतिशयः स्नेहः एव भक्तिपदवाच्य इति प्रत्यपादि । अत एव पुष्टिभक्तावपि स्नेहस्यैव मूर्धन्यस्थानं राराजते ।

पुष्टिभक्तौ माहात्म्यज्ञानापेक्षया भगवदनुग्रहस्यैव विशिष्टं नियामकत्वम् ।

चिदानन्दधनः लीलावपुः श्रीकृष्णः पुष्टिभक्तान् कृतार्थीकर्तुमेव बालभाव–पुत्रभाव–सखिभावादिलीलां तनोति । तत्र यदि भक्तः माहात्म्यज्ञानी तदा तद्तद्भावानां लीला न संभवति, तस्माद् भगवान् कर्तु–अकर्तु–अन्यथाकर्तु समर्थः भक्ते माहात्म्यज्ञानं तिरोदधाति । भगवतो प्रादुर्भावसमये देवकी स्तुवन्ती भगवन्तं कालस्थापि कालं स्तौति चैवं भगवतः माहात्म्यज्ञानं वर्णयति । भगवांश्च देवक्यां मातृभावं जनयितुमियेष अतः क्षणे एव माहात्म्यभावं तिरोधाय स्नेहभावं जनयामास । तथैव मातरं यशोदामपि श्रीमुखे ब्रह्माण्डं प्रदर्श्य शीघ्रमेव माहात्म्यभावमपाकृत्य पुत्रभावं सञ्चारयामास । एवंविधोऽनुग्रह एव पुष्टिपदवाच्यः । यत्र प्रभुसुखस्यैव मुख्यो विचारः सैव पुष्टिभक्तिः ।

कृपावत्सलः भगवान् पुष्टिभक्तेभ्यः कृपां कृत्वा स्वस्य स्वरूपस्य दानं ददाति

तस्माद् तादृशस्य जीवस्य कर्तव्यं प्रभुसेवैव भवति नान्यत्। प्रभुसुखस्य विचारकरणमेव पुष्टिभक्तिः। प्राथमिकावस्थायां भक्तः देहेन्द्रियद्रव्याणां भगवति विनियोगं विधाय तेन च बहुशः स्वस्वाहतां मतताञ्च दूरीकरोति। भगवत्स्वरूपे यथा यथा भावः वर्धते तथा तथा भक्तस्य मनः भगवदुत्सवमग्नं जायते। प्रभुसेवायाञ्च बाह्यपदार्थविस्मृतिः एषैव मानसीसेवा कथ्यते – चेतस्तत्प्रवणं विना चित्तं भगवति, तदूपरिचर्यायां लीलायाञ्च तल्लीनं स्याद् एषा सेवा प्रोच्यते।

वेणुगीते **धन्याः स्म मूढमतयो** – इत्यादिषु मृग्यः अस्मन्नेत्रसोन्दर्यकारणेन गोपाङ्गनानेत्र स्मारकत्वात् भगवतः प्रिये नेत्रे इत्थं ज्ञात्वा नेत्राभ्यां भगवत्पूजां विदधति – पूजां दधुर्विरचितां प्रयणावलोकैः। पुष्टिभक्तौ भगवद्ज्ञानं नाम देशकालानुसारं भगवदपेक्षितं किमिति ज्ञानं च स्वस्य ज्ञानं नाम पदार्थेषु केचन पदार्थाः भगवदर्पणयोग्याः इत्युभयं ज्ञानं सेवायाः अङ्गमस्ति।

पुष्टिभक्तौ भगवदङ्गीकृतः स्वीकार एव प्रधानः

श्रीमदाचार्यमते पुष्टिभक्तिर्न हि साधनसाध्या अपि तु भगवदङ्गीकृतेनैव शक्या वर्तते। जीवप्रलयदशायां पुनरुत्थानसमये भगवान् कांश्चन भक्तान् विशेषमनुगृह्णाति। श्रुतिरपि श्रावयति – **नायमात्मा .... यमेवैषवृणुते तेन लभ्यतस्यैष आत्मा विवृणुते तनू : स्वाम्**। परमात्मा यं वृणुते स एव तमाप्नोति। अनेन ज्ञातं भवति यद्भजनानन्दरसपुष्टाः दैवीजीवाः साक्षाद्रसात्मकधर्मीस्वरूपेण स्वीकृताः सन्ति।

पुष्टिभक्तस्य कर्तव्यानि

पुष्टिभक्तौ भगवदनुग्रह एव नियामकः तस्मात् विना कृपां नान्यत् साधनं संभवति। स चायं भगवदनुग्रहः कदा ? कस्मै ? प्राप्तो भवेदिति न कोऽपि जानाति। अतः तद्योग्यतावाप्त्यै जीवः तत्परो भवेत्। तदर्थञ्च अधोनिर्दिष्टरीत्या जीवनं चालयेत्–

तथैव तस्य लीलेति मत्वा चिन्तां द्रुतं त्यजेत्।

जीवः सर्वं भगवल्लीलामयं मत्वा प्रपञ्चं ममत्वञ्च सर्वतः त्यक्त्वा भगवत्स्वरूपभावनां भावयेत्। एवमेव महाप्रभुवचनानुसारं यद्रुचीकरमरुचीकरं तत्र भगवतो लीलैव कारणं जानीयात्।

भगवतोऽन्याश्रयाश्रितः शास्त्रेषु दृढश्रद्धश्च भवेत्। दुरत्यया या माया तस्याः निरासाय श्रीउद्धवमते भक्तवदुपदुक्तान् माला–चन्दन–वस्त्र–अलंकार दधानः च भगवत्प्रसादान्नभोक्ता मायां जयति।

पुष्टिभक्तिशास्त्रं कस्मै ?

पुष्टिभक्तिप्रवर्तका: श्रीमदाचार्यचरणा: तत्त्वार्थदीपे निबन्धे आदिशन्ति –

सात्त्विका भगवद्भक्ता ये मुक्तावधिकारिण: ।
भवान्तसम्भवाद्दैवात् तेषामर्थे निरूप्यते ॥

ये सत्त्वगुणाश्रिता: भक्तेरधिकारिण: भगवद्भक्ता: पूर्वजन्मोपार्जितपुण्य-संयोगान्तजन्मान: सन्ति तेभ्य एव पुष्टिभक्तिनिरूपणं क्रियते।

पुष्टिभक्तेर्फलम्

पुष्टिभरक्तेर्फलस्वरूपेण जीव: प्रभुणा सह संभाषणं, गानं, रमणं- आदे: योग्यतामवाप्नोति चालौकिकं सामर्थ्यं लभते । अयमेव पुष्टिभक्तानां मोक्ष: । पुष्टिभक्तचतुर्विधां मुक्तिं न कामयेत्। तन्मते मुक्तिस्तु निकृष्टा। वेणुगीते यथा –

अक्षण्वतां फलमिदं न परं विदाम: ।

अत्र गोप्य: प्रतिपादयन्ति यदिन्द्रियवतां जीवानां फलम् इदं भगवत्स्वरूपमेव वर्तते न परम् मोक्षफलं नास्ति। अत: सर्वेन्द्रियै: सर्वात्मभावेन भगवत्स्वरूपरसास्वादनं जीव: लभेत इदमेव मुख्यं फलं वर्तते चेदं रसफलं सर्वभावपूर्वकशरणागत्यैव लभ्यते नान्यथा। श्रीभगवान् भगवद्धर्माश्च जीवजीवधर्मेभ्य: उत्तमोत्तमा: तदर्थमेव गोपीनां स कृष्ण:, अहं कृष्ण: इत्थं अखण्डाद्वैतज्ञानं भवति जीवेभ्यश्च तदुत्तमम् । भगवत्कृपाजनकत्वात्। अत एव ज्ञान्युद्धव: –

वन्दे नन्दव्रजस्त्रीणां पादरेणुमभीक्ष्णश: ।

व्रजस्त्रीणां पादधूलिं नौमि अनयोक्त्या शुद्धा: पुष्टिभक्ता: गोपाङ्गना: श्रेष्ठतमा इति सिध्यति।

एवं प्रकारिका पुष्टिभक्तिर्हि परमभाग्यवद्भि: भगवदीयै: विरहात्मकापक्लेशेनावाप्यते।

६.

श्रीमच्चैतन्यमहाप्रभूणां भक्तिधर्मः

श्रीगौडीयसंप्रदायप्रवर्तकाः नामसंकीर्तनामृतधाराप्रवाहकाः श्रीमच्चैतन्यमहाप्रभवः श्रीगौडीयवैष्णवधर्मस्य मुख्यानि पञ्चलक्षणानि प्रतिपादयामासुः।

श्रीवैष्णवाचार्यवर्याः श्रीविश्वनाथचक्रवर्तिनः सूत्ररूपेणैकेनैव पद्येन तानि लक्षणानि व्यंजयामासुः अतः तान्येव प्राथम्येन वर्ण्यन्ते।

आराध्यो भगवान् व्रजेशतनयः तद्धाम वृन्दावनं
रम्या काचिदुपासना व्रजवधूवर्गेण या कल्पिता।
श्रीमद्भागवतं प्रमाणममलं प्रेमा पुमर्थो महान्
श्रीचैतन्यमहाप्रभोर्मतमिदं तत्रादरो नः परः॥

अस्मदाराध्य व्रजेशनन्दनः श्रीकृष्णः तद्धाम च वृन्दावनं, व्रजांगनागणाविष्कृता सुन्दरोपासना, श्रीमद्भागवतमेव विशुद्धप्रमाणग्रन्थरत्नं च प्रेम-भक्तिः परमपुरुषार्थः वर्तते – अयमेव हि श्रीचैतन्यमहाप्रभुराद्धान्तः।

भक्त :

तत्र सर्वप्रथमं उपास्यतत्त्वमेव निर्णेतव्यम्। अपि च तत्रैव उपास्योपासकयोः को संबंधः ? इत्येतदपि निश्चेतव्यम्। मनुष्यः मनोवृत्यनुसारं चतुर्धा विभाज्यते विद्वद्भिः। श्रीरूपगोस्वामिनां मते १. अन्याभिलाषी २. कर्मी ३. ज्ञानी ४. भक्तियोगी च।

तत्र भक्तिज्ञानकर्ममार्गनिन्दकाः चार्वाकादयः अन्याभिलाषीकोटौ ऋणं कृत्वा घृतं पिबेत् इति मनोवृत्तयः समाविष्टाः भवन्ति।

न्यासिनामिह कर्मसु वाक्यानुसारं कर्मफलाशक्तानां जीवानां कृते कर्मयोगः प्रशस्तः।

कामकामिनः पुनरपि जननं पुनरपि मरणं चक्रे नियततां नात्यन्तदुःखनिवृत्तिः एतद्दृष्ट्वा बुद्धिमन्तः नितरां निर्वेदमवाप्नुवन्ति। ते च निर्वेदस्य फलस्वरूपेण गृहादिकं त्यक्त्वा ज्ञानयोगं समाश्रयन्ति च केवलं बोधयातिकठिनां साधनां कुर्वन्ति। एवं

क्रियमाणे तस्मिन् भोगवासनारहिते चेतसि जाते सति भगवद्भजनमार्गत्यागे दंभकारणात् पुनः सः पतति।

अतः भक्तिरेव गरियसी साधकेभ्यः। भक्तिमार्गोपासकेभ्यः उपास्यनिर्णयाय भगवानमिमां मुक्तिमुपदिशति।

अहं सर्वस्य प्रभवः मत्तः सर्व प्रवर्तते।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः॥

(भ.गी.१०/०८)

एतादृशाः शुद्धभक्तिलब्धारः भक्ताः मे सेवां लभन्ते। इदमेव जीवेभ्यः निःश्रेयसं वर्तते। एवं भक्तियोगे सुरुढो भक्तः –

भक्तियोगेन मनसि सम्यक् प्रणिहितेऽमले।

(भा.०१/०७/०४)

सूक्त्यनुसारं भगवतो नित्यचिन्मयमूर्तिं ध्याननेत्राभ्यां पश्यति च तामेव मूर्तिं अर्चास्वरूपे जनयति।

श्रीकृष्णतत्त्वविवेचनम्

कृष्णस्तु भगवान् स्वयम्

(०१/०३/३८ भा.)

श्रीमद्भागवते व्यासमहर्षिणा प्रत्यपादि। ब्रह्मसंहितायां समुद्घोषितञ्च –

ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः।
अनादिरादिर्गोविन्दः सर्वकारणकारणम्॥

०५/०१

आभ्याञ्च विदितं भवति यत् श्रीकृष्ण एव सर्वदेवेश्वरेश्वरः वर्तते। तत्रैव इत्थमपि प्रतिपादितं वर्तते–

रामादिमूर्तिषु कलानियमेन तिष्ठन् नानावतारमकरोद् भुवनेषु किन्तु।
कृष्णः स्वयं समभवत् परमः पुमान्यः गोविन्दमादिपुरुषं तमहं भजामि॥

श्रीकृष्ण एव स्वयं अंशकलादिरूपेण रामाद्यवतारेषु आविर्भवति। गीतायामपि श्रीकृष्णोऽचकथत् –

वैदैश्च सवैरहमेव वेद्यः च ब्रह्मणो हि प्रतिष्ठाहम् एवमेव श्रीमद्भागवतेऽपि

वासुदेवपरो ब्रह्मन् न चान्योऽर्थोऽस्ति तत्त्वतः।

(भा. ०२/०५/१४)।

तत्रैवं श्रीकृष्णः स्वयं स्वविभूतिं वर्णयन् उद्धवायोपदिशति –

वासुदेवो भगवतां त्वं तु भागवतेष्वहम् ।

(भा.११/१६/२९)

वेदेष्वपि –

यद्वैतत् सुकृतं रसो वै सः ।

(तै.उ.०२/०७/०१)

आनन्दमयविग्रहः श्रीकृष्ण एव आनन्दकामिनामुपास्यः वर्तते ।

एभिः पूर्वोक्तैरुदाहरणैः प्रमाणितं भवति यद्भगवान् व्रजेशनन्दन एव आनन्दमाधुर्याश्रितभक्तियोगावलम्बनधृतदेहेभ्यः एक एव उपास्यो वर्तते ।

श्रीचैतन्यमहाप्रभुवर्याः श्रीकृष्णं व्रजदेवीयशोदानन्दनं स्तनन्धयं यथा स्तौति न तथा मथुराद्वारकाधामाधीशम् । ते च विशेषरूपेण मधुररसास्वादतत्पराः अहर्निशं श्रीश्रीराधाकृष्णं युगलस्वरूपमेव स्वाराध्यात्वेनाङ्गीकुर्वन्ति । अयमेव च तेषां राद्धान्तः फलितो भवति ।

उपासनापद्धतिः

श्रीचैतन्यमते उपासनालक्ष्यं तस्य प्रीतिप्राप्तिरेव । वृन्दावने लक्षणया तेन सह गोवर्धने राधाकुण्डे सर्वत्र व्रजभूमौ च मधुररसस्य सेवैव श्रीकृष्णस्य परमाह्लाददायिनी तस्मात् तस्यैव यत्नपूर्वकं साधना कर्तव्या ।

सर्वेऽपि जीवाः परस्परं पञ्चरससम्बद्धाः दृश्यन्ते यथा – केचन सम्बन्धिनः मनसा वाचा देहेन अस्मानुपकुर्वन्ति । ते च शान्तरससम्बद्धाः सन्ति । केचनाहर्निशं अस्मद्सुखाय निःस्वार्थभावेन कार्याणि कुर्वन्ति । तेषां ममतामयीवृत्तिः भवति । अत्र दास्यरसः वर्तते । अन्ये पुनः सख्यरसरसिकाः सखायः खेलादिकर्मणा समानभावेन अस्मभ्यम् प्रीतिं यच्छन्ति । पितरौ च ममताधिक्यभाजौ भवतः । तस्मादुभौ वात्सल्यरसेन अस्मान् पालन–पोषणशासनयोग्यान् ज्ञात्वा सखिभ्योऽपि अधिकप्रीत्या प्रपालयन्ति ।

सर्वोत्तमममताधिक्यमनन्यभावे सम्भवति तत्र एकीभावेन तादात्म्यभावेन पुष्टे, कान्तामाधुर्येण परमोज्ज्वलश्रृंगाररसे दृश्यते । स्वाङ्गपर्यन्तसर्वस्वसमर्पणेनापि एतादृशी एकाकारभूता मधुरातिमधुरा रसमयी सेवा नान्यत्र कुत्रापि सम्बन्धविशेषे दृश्यते ।

पूर्वोक्तपञ्चरसाश्रयभूतानां व्रजवासिनां श्रीकृष्ण एव ऐकान्तिकी भक्तिः आसीन्नान्यत्र । श्रीचैतन्यमहाप्रभुरसदीक्षिताः श्रीगोपस्वामिपादाः श्रीहरि–भक्ति–

रसामृतसिन्धोः पूर्वभागस्य द्वितीये भागे प्रोचुः –

किन्तु प्रमैकमाधुर्यभुज एकान्तिनो हरौ ।
नैवाङ्गीकुर्वते जातु मुक्तिं पञ्चविधामपि ॥

(श्री.ह.भ.रसामृत.पू.भा.द्वि.भा.)

त एव दुर्गसङ्गमन्यां टीकायां पद्यमिदं व्याख्यायन्ति । ततः साक्षात् तदीय सेवयैव पुनर्लब्धपरमानन्दाः । गोविन्दः श्रीगोकुलेन्द्रः, श्रीशः परमव्योमाधिपः, उपलक्षणत्वेन श्रीद्वारकानाथोऽपि । रसेन सर्वोत्कृष्टप्रेममयरसेनेत्यर्थः । उत्कृष्यते ... .. उत्कृष्टतया प्रकाश्यते । यतः तस्य रसस्य एवैष स्थितिः स्वभावः यत्कृष्णरूपमेवोत्कृष्टत्वेन दर्शयति इति ।

अत एव श्रीचैतन्याचार्याः श्रीमद्भागवतस्य रसास्वादे वृन्दावनलीलोत्कर्ष दर्शयामासुः । अत्र रसमयत्वे श्रीमद्भागवतमेव प्रमाणम् –

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥

(भा.०१/०१/०३)

वेदकल्पतरोः रसमयं मधुरं फलं नाम श्रीमद्भागवतम् । अपि च द्वादशस्कन्धे–

सर्ववेदान्तसारं हि श्रीमद्भागवतमिष्यते ।
तद्रसामृततृप्तस्य नान्यत्र स्याद्रतिः क्वचित् ॥

–(भा. १२/१३/१५)

अत्र श्रीकृष्णलीलैव रसः वर्तते । एतस्माद् सिध्यति यद् श्रीकृष्णोपासनैवोपास्या । परमपुरुषार्थरूपा भक्तिरेव

कर्मिणः त्रिवर्गकामिनः भवन्ति । तेषां धर्मार्थकामाः प्रार्थनीयाः भवन्ति । ते च धर्माचरणेन पुण्यलोकं वांछन्तः भोगांल्लब्धुं कामयन्ते । तद्कामवर्णनं वेदेऽपि यथा –

स्वर्गेलोके न भयं किंचनास्ति न तत्र त्वं जरया बिभेति ।
उभे तीर्त्वाशनायापिपासे शोकातिगः मोदते स्वर्गलोके ॥

(कठो. ०१/०१/१०)

नचिकेताः भोगाकांक्षा निवर्त्य स्वर्गसुखस्य अस्थायित्वं प्रतिपादयामास यथा –

अपि सर्वं जीवितमल्पमेव तवैव वाहास्तव नृत्यगीते ।

तत्र जीवनमल्पमेन न सनातनत्वम्। अर्थार्जने नाशापूर्तिः संभवति सर्वे चैतद् जानन्ति अनुभवन्ति च। अर्थोऽनर्थकरो महान् इति श्रीमद्भागवत एव गदितम् यथा –

स्तेयं हिंसानृतं दंभः कामः क्रोधः स्मयो मदः।
भेदो वैरमविश्वासः संस्पर्धा व्यसनानि च॥
एते पञ्चदशानर्थाः ह्यर्थमूला मता नृणाम्॥

(भा. ११/२३/१८-१९)

कामोऽपि न सुखाय यतो हि दत्तप्राप्तौ दुःखं, प्राप्तिचेष्टापि दुःखदा, प्राप्तेऽपि अल्पकालभोगत्वं क्षयश्च जायते। अर्थप्राप्तिवद् कामेच्छापि भूयोभूय वर्धत एव –

न जातु कामः कामनामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते॥

(भा. ०४/१०/२३)

न भोगेन कामः शाम्यति परं अग्नौ घृतादिना इव उत्तरोत्तरं संवर्धत एव। अतः स्वर्गसुखालब्धिकामाः त्रिवर्गानुयायिनः पुण्यकर्मैव धर्म इति कथयन्ति। परं परो धर्मः भिन्नः स च श्रीमद्भागवते यथा –

स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे।
अहैतुक्यप्रतिहता ययात्मा सम्प्रसीदति॥

(भा. ०१/०२/०६)

यया क्रियया अधोक्षजे श्रीकृष्णे भक्तिरुत्पद्यते स एव परमः धर्मः नान्यः। अतः करुणासिन्धुः जगदीशः श्रीकृष्णः वेदपुराणानि निर्ममे। स च वेदः संबंधाभिधेयप्रयोजनदर्शकः। श्रीकृष्णप्राप्तिरेव सम्बन्धः, कृष्णभक्तिरभिधेया च कृष्णप्रेमप्रयोजन वर्तते। तत्र ज्ञान-कर्म-भक्तिमार्गाः दर्शिताः उत्तरोत्तरं प्रामाण्यनियमेन तत्र भक्तिरेव गरियसी।

नामनामिनोश्चाभेदात् तज्जयः तदर्थभावनम् इति योगसूत्रानुसारं पद्मपुराणस्य प्रामाण्येन यथा –

नामचिन्तामणिः कृष्णः चैतन्यरसविग्रहः।
पूर्णः शुद्धः नित्यमुक्तोऽभिन्नतन्नामनामिनोः॥

नामसंकीर्तनमेव चिन्तामणिकल्पं मनोवांछितदायकमिति फलितम्। एवं चैतन्यमते भक्तिनिरूपणं समाप्तिमगात्।

७

भक्तिसूत्रैस्सह तुलनात्मकं प्रकरणम् ।

१. ॥ शाण्डिल्यानि ॥

१. प्रास्ताविकम् ।

२. अन्यमतानि ।

३. सूत्रकारपरिचयः ।

४. ग्रन्थतालिका ।

५. नारदमुनेः परिचयः ।

६. सूत्राणामध्ययनम् ।

७. अथातो भक्तिजिज्ञासा ।

८. सा परानुरक्तिरीश्वरे ।

९. तत्संस्थस्यामृतत्वोपदेशात् ।

१०. ज्ञानमिति चेतद् द्विषतोऽपि ।

११. तया ज्ञानादीनामुपक्षयात् ।

१२. हेया रागत्वादिति चेन्नोत्तमास्यपदत्वात् ।

१३. बुद्ध्यानन्त्यात् ।

१४. तत्परिशुद्धिश्च लिंगेभ्यो गम्या लोकवत् ।

१५. सम्मानादिभ्यो बाहुल्यात् ।

१६. द्वेषादयस्तु नैवम् ।

१७. तद्वाक्यशेषात् प्रादुर्भावेष्वपि सा ।

१८. जन्मकर्मविदो जन्माभावाः ।

१९. तच्च दिव्यं स्वशक्तिमात्रोद्भवात् ।

२०. वासुदेवस्य तुल्यमिति चेन्नाकारमात्रत्वात्तस्य ।

२१. स्मरणकीर्तनादीनां पापनाशे प्रायश्चित्तभावात् ।

२२. अतो हि विपक्वभावानां तल्लोके तदाचरणम् ।

२३. भजनीयमिदमद्वितीयं कृत्स्नस्य तत्स्वरूपत्वात् ।

२४. न प्राणिबुद्धिभ्योऽसंभवात् ।

२५. मनोऽतत्त्वव्यवहारः ।

२६. अनन्यभक्त्या तद्बुद्धिलयादत्यन्तम् ।

२. ॥ नारदीयानि ॥

२.१. सा तस्मिन् परमप्रेमस्वरूपा ।

२.२. यल्लब्ध्वा पुमान् सिद्धो भवति, अमृतो भवति, तृप्तो भवति ।

२.३. यज्ज्ञात्वा मत्तो भवति, स्तब्धो भवति, आत्मारामो भवति ।

२.४. तस्मिन्नन्यता तद्विरोधीपूदासीनता च ।

२.५. नारदस्तु तदर्पिताखिलाचारता तद्विस्मरणे परमव्याकुलतेति ।

२.६. फलरूपत्वात् ।

२.७. ईश्वरस्यापि अभिमानद्वेषित्वाद् दैन्यप्रियत्वाच्च ।

२.८. तस्मात्सैव ग्राहया मुमुक्षुभिः ।

२.९. अव्यावृतभजनात् ।

२.१०. लोकेऽपि भगवद्गुणश्रवणकीर्तनात् ।

२.११. महत्संगस्तु दुर्लभोऽमोघश्च ।

२.१२. लभ्यतेऽपि तत्कृपयैव ।

२.१३. तदेव साध्यताम् तदेव साध्यताम् ।

२.१४. दुःसंगः सर्वथैव त्याज्यः ।

२.१५. कामक्रोधमोहस्मृतिभ्रंशबुद्धिनाशसर्वनाशकारणत्वात् ।

२.१६. कस्तरति मायां, कस्तरति मायाम् ? यः संगांस्त्यजति, यो महानुभावं सेवते, निर्ममो भवति ।

२.१७. सः तरति, सः तरति सः लोकांस्तारयति ।

२.१८. तत्प्राप्य तदेवावलोकयति, तदेव श्रुणोति, तदेव भाषयति, तदेव चिन्तयति ।

२.१९. गौणी त्रिधा गुणभेदादार्तादिभेदाद्वा ।

२.२०. लोकहानौ चिन्ता न कार्या, निवेदितात्मलोकवेदत्वात् ।

२.२१. स्त्रीधनास्तिकचरित्रं न श्रवणीयम् ।

२.२२. त्रिरूपभंगपूर्वकं नित्यदासनित्यकान्ताभजनात्मकं प्रेमैव कार्यम्, प्रेमैव कार्यम् ।

२.२३. कण्ठावरोधमांचाश्रुभिः परस्परं लपमानाः पावयन्ति कुलानि पृथिवीं च ।

२.२४. तन्मयाः ।

२.२५. सर्वदा सर्वभावेन निश्चिन्तितैः भगवानेव भजनीयः ।

८
भक्तिः

१. प्रास्ताविकम्

श्रृणु सखि कौतुकमेकम् नन्दनिकेतनाङ्गणे मया दृष्टम् ।
गोधूलिधूसराङ्गः नृत्यति वेदान्तसिद्धान्तः ॥

भारतीय वाङ्मये ज्ञानकर्मभक्तिप्रतिपादकानि अगणितानि शास्त्राणि गगनमण्डले तारा इव चकासति तत्र कानिचन गद्यबद्धानि कानिचन पद्यबद्धानि अन्यानि च सूत्रबद्धानि सन्ति ।

सूत्रभूतान्येव शास्त्राणि आद्यानि जलपात्रे सागर, इव बहूपादेयानि सर्वहितकारीणि च वर्तन्त इति समेषामपि विदुषां समष्ट्या समस्वरः श्रूयते ।

न केवलं धर्मशास्त्रेऽपितु व्याकरणे पाणिनेः सूत्राण्येव मूर्धाभिषिक्तानि राराजन्ते । न्याये गौतमग्रथितसूत्राण्येव गरिमवन्ति, गौरवदायीनि सन्ति तथैव गृह्यसूत्राणि आपस्तम्बसूत्राणि गोभिलसूत्राणि, ब्रह्मसूत्राणि, ज्योतिषे ग्रथितसूत्राणि, साम्प्रतं गणितेऽपि सूत्राण्येव सारमादधन्ति सर्वातिशयेन शेखरायन्ते इति ।

इत्थञ्च इमानि सूत्राण्येव तत्तत्प्रवाहस्य मूलमिति प्राचार्याः प्रोचुः । एतेषामेव सूत्राणां व्याख्यानरूपाः नैके ग्रन्थाः स्वग्रन्थस्वरूपमापुरित्यपि निश्चप्रचमेव ज्ञायते सर्वैः स्वीक्रियते च ।

एवमेव श्रीमद्भागवतादीनां भक्तिशास्त्राणां मूलं किम्? इति जिज्ञासायां इमानि नारदशाण्डिल्यमुन्योः सूत्राण्येव इत्युत्तरं तथ्यकोटिमाटीकते नान्यत् ।

एतेषु च भक्तिसूत्रेषु नारदशाण्डिल्याभ्यां मुनिभ्यां पराभक्तिस्वरूपं प्रत्यपादि । इत्थञ्च पराभक्तिः जीवने ग्रथिता सती जीवानां मानवानामन्तःकरणं विशुद्धिमाप्नोति ततश्च तादृशे शुद्धेऽन्तःकरणे स्वयमेव "सत्यं ज्ञानमनन्तम्" इति सत्यं ज्ञानमुत्पद्यते । तादृशा च ज्ञानेन निष्कामस्य कर्मणः आचरणं भवति ।

यथा बालानां क्रीडनकेषु रतिर्जायते न तथा तत्र वृद्धानां, तथैव संसारस्य ये

विषयाः तेऽल्पधियां बालमतीनां क्रीडनकवद्भवन्ति। न तत्र वास्तविकं सुखमाप्यते कैश्चिदपि।

तथापि ते तत्र आनन्दानुभवं कुर्वन्ति, स चानन्दः क्षणिकः नाशवान् भवति परिणामे च तत्र दुःखानुभवोऽवशिष्यते।

शरीरेन्द्रियाणां या विषयेच्छा सा "**आसक्तिः**" कथ्यते। तस्याः आसक्तेः पूर्तये भिन्नभिन्नदेवानां पूजोपासनारूपा या भक्तिः सा "**सकामा**" निगद्यते। तस्या एवापरन्नाम "**अपराभक्तिः**" इत्यस्ति।

आसक्तिं विहाय आत्मनः निर्लेपे स्वाभाविके स्वरूपे निष्कामभावेन प्रेमोत्पत्तिः पराभक्तिः कथ्यते।

आत्मनः निस्पृहस्य निष्कामस्य स्वतः तृप्तस्य स्वरूपस्य अनुभविनः भक्ताः पराभक्तिवन्तः भवन्ति। आलस्याः संसारस्य विषयोपभोगासक्ताः रमन्ते।

पराभक्तिभावभरितः भक्तः जगति न स्वस्य शरीरसुखाय, अपि तु जगतः प्राणिमात्रस्य सुखाय सर्वमाचरति। न तथाचरितानि तानि कर्माणि तस्य भक्तस्य बन्धीनि भवन्ति। परं उत्तरोत्तरं विशिष्टचित्तशुद्धिकारकाणि जायन्ते। तामेव परां भक्तिं भक्तिसूत्राणीमानि ज्ञापयन्ति।

प्राचीनार्वाचीनाश्च प्राचार्याः शेमूषीजुषः सर्वेऽपि भक्तिसूत्रेषु स्वीयां व्याख्यां प्रणिनिन्युः। तत्राधुनिकाचार्यः ओशो वदति यत् —

१. कलानामपि कलाः नाम भक्तिः।

२. प्रसादस्वरूपा भक्तिः।

३. योगभोगयोः सङ्गीतन्नाम भक्तिः।

४. अनन्तपुरुषोत्तमाङ्गणे नृत्यन्नाम भक्तिः।

इदन्तु नाविदितं तत्र भवतां यन्मननत्राणपरैः मुनिभिः विविधदर्शनशास्त्राणि मानवानां निःश्रेयसायैव ग्रथितानीति।

तत्र कतिचन प्रकृतिपुरुषज्ञानेनैव तापत्रयनिवृत्तिं वदन्तः अन्यानि आत्मनः श्रेयोमार्गे परिपूर्णं साधनं मन्यमानानि विरमन्ति।

अन्ये च न केवलं विवेचनेन तापत्रयोपशमः सुलभः इति विचार्य योगानुशासनमाश्रयन्ते ते च यमनियमासनप्राणायामप्रत्याहारधारणा ध्यानसमाधिभिः तापत्रयोपशान्तिम् अवलोकयन्तः, योगसाधनेषु ईश्वरप्रणिधानमन्तर्भावयन्तः ईश्वरे ईषद् प्रेम प्रकशायन्तीव।

अपरे वेदस्यैव प्रामाण्यमाधिक्येन समर्थयन्तः कर्मभिरेव श्रेयः पश्यन्तः महदुद्घोषेण कमवादान् विचारयन्तो गमनागमनलक्षणभवाटवीमार्गपरिभ्रमणान्नान्यद मृतमवलोक्यन्ति।

अन्ये पुनः पदार्थानां तत्त्वज्ञानेनैव मोक्षमाख्यापयन्तः तन्निरूपणायप्रवृत्तोः आत्मपरमात्मनो स्वरूपभावौ यथानिजदर्शनं वदन्तोऽपि, अपवर्गस्य तत्साधनानाञ्च व्याख्यानावसरे तत्र दृष्टिं न कुर्वन्तः परमाणुपारिमाण्डल्यादिस्वरूपं विशेषेण मन्यमानाः महता ग्रन्थसन्दर्भेण अनुमानप्रमाणं कृतकृत्यात्मनो मन्वते।

ज्ञानावतारः व्यासः महर्षिस्तु सर्वमसारं निराकुर्वन् सारतमं निःश्रयसे एकमौपनिषदं मार्गं प्रकटीचकार येनाक्षरं पुरुषं वेद सत्यम् इत्यादिभिः औपनिषदैः वाक्यैः।

इदं हि शारीरकमीमांसा परब्रह्मविचारलक्षणपराः मुख्यत्वेन तस्य परब्रह्मणः स्वरूपं निरूप्य तस्य प्राप्तौ साधनं किमिति प्रश्ने समुत्पन्ने उपासनमेवेत्युत्तरम्। तच्चोपासनं विद्याभेदमुखेन निरूप्यमाणं प्रेमगर्भमेव। उपासनं नाम ध्रुवा स्मृतिः सा च प्रेमगर्भैव सिद्धा भवति। नान्यथा इयं मीमांसा भक्तियोगं परमेश्वरविषयकप्रीतिरूपापन्नम् उपासनलक्षणं वर्णयति।

महर्षिः शाण्डिल्यस्तु परमेश्वरविषयकां परमप्रेमलक्षणा भक्तिं अयुक्तसाधनफलभावां प्रधानतया निरूपयन् भक्तिमीमांसालक्षणशास्त्रम् –

अथातो भक्तिजिज्ञासा

इत्यादिना रचयामास। इदं हि भक्तिशास्त्रं भक्तिं यथास्वरूपं जिज्ञासमानैरवश्यं पाठ्यमध्यापनीयं श्रव्यं विचार्यञ्च।

१.२.अन्यमतानि :-

साम्प्रतं विचारयामः केषां मते ईश्वरे भक्तिः श्रेयसे केषाम्मते न इति। ईश्वरः एतादृशः श्रेयश्चेदित्थम्, अत्र मतमतान्तराणि दृष्टिपथं विभूषयन्ति।

यतो हि साङ्ख्याः निरीश्वरवादिनः सन्तोऽपि कपिले धर्मज्ञानैश्वर्यसम्पन्ने भक्तिः श्रेयस इति आमनन्ति। तन्मते श्रेयश्च ज्ञानाद्युत्कर्षसिद्धिः। अन्यस्य दृष्ट्या तु तदुभयं सातिशयम्।

इत्थमेवान्ये निरीश्वरेवादिनो वदन्ति।

पातञ्जलाः क्लेशकार्माद्यैः अपरामृष्टमीश्वरं नित्यं मन्यन्ते, तस्मिँश्च भक्त्या श्रेयः योगानामङ्गानां निष्पत्तिः, समाधिलाभो वा भवतीति भणन्ति।

निर्दिशेषचिन्मात्रं ब्रह्म इति भणन्तोऽपि ब्रह्मवादिनः मायाशंवलितं सगुणं

ब्रह्म परमेश्वरम्, तस्योपासनञ्च परमप्रेमरूपं वर्तते तस्माद् अपुनरावृत्तिलक्षणं श्रेयः स्वीचक्रुः ।

आक्षपादा अपि परमात्मानं सर्वज्ञं सर्वशक्तं सर्गादेः परमेश्वरम्, तद्ध्यानपर्यान्तायाः भक्तेः आत्मसाक्षात्कारसम्पत्तिलक्षणे श्रेयसि द्वारतां अभ्युपाजग्मुः ।

न्यायाचार्येण गदितञ्च–

न्यायचर्येयमीशस्य मननव्यपदेशभाक् ।
उपासनैव क्रियते श्रवणानन्तरागता ॥

ये पुनः आन्दमयं परं विज्ञानमयाज्जीवात्मनोऽन्यम् अन्याश्रयम् अखिलाश्रयं अखिलकारणं मुक्तलक्षणा भक्तिः साधनसाध्योभयदशायां चानुवर्तमाना निरतिशयतां लभते ।

महर्षेः शाण्डिलस्यापि इदमेवाभिमतं मतम् । भगवतश्चेदमेव हार्दम् । भगवता श्रीकृष्णेन श्रीमद्भगवद्गीतायां भक्तेरेव परमनिःश्रेयससाधनत्वं जेगीयते ।

१. **मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।**

२. **सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।**

३. **मन्मना भव मद्युक्तो मद्याजी मां नमस्कुरु ।**
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥

४. **भक्त्या त्वनन्यया शक्यः ।**

५. **मय्यैव मन आधात्स्व .... ।**

इमानि हि नारदशाण्डिल्यसूत्राणि ब्रह्मसूत्रपश्चाद्वर्तीनि इति तत्रैव बादरायणमतप्रदर्शनात् दृश्यन्ते ।

"आत्मैकपरां बादरायण" इति ।

१.३. सूत्रकारपरिचयः –

महर्षिः शाण्डिल्यवर्योऽयं कः? इति विचारसरण्यां केचन छान्दोग्ये तृतीयाध्याये चतुर्दशे खण्डे– इति हस्माह शाण्डिल्यः शाण्डिल्यः – इति ब्रह्मविद्यायाः प्रवर्तकत्वात् श्रूयमाणं शाण्डिल्यं सस्मरुः ।

प्रमाणञ्चात्रेदमेव भक्तिशास्त्रे ते वदन्ति यत् "**तामैश्वर्यपरां काश्यपः**" एभिः सूत्रैः शाण्डिल्यमुनिना परमतानन्तरं संस्थानपुरस्सरं ब्रह्मविद्यायाः पारमैश्वर्यान्तरात्मवत्वाद् भयविषयता एव स्वाभिमता प्रादर्शि ।

या शाण्डिल्यविद्योपनिषदि श्रूयते तत्र ब्रह्मविद्याया उभयपरता स्फुटा प्रतिपाद्यते यथा –

मनोमयः प्राणशरीरनेता भारूपः, सत्यसङ्कल्प आकाशात्मा सर्वकर्मा सर्वकामः, सर्वगन्धः, सर्वरसः, सर्वमिदमभ्यात्तोऽवाक्यनादरः, एष मे आत्मा अन्तर्हृदयेऽणीयान् ब्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा श्यामाकतण्डुलाद्वा, एष मे आत्मा अन्तर्हृदये ज्यायान् पृथिव्या ज्यायानन्तरिक्षात् दिवो ज्यायान् ज्यायानेभ्यो लोकेभ्यः इति –

अत्र पूर्ववाक्येषु परमेश्वरस्य असाधाराणधर्मो मनोमयत्वादिः, उत्तरवाक्येषु अन्तरात्मता, इत्थम् उभयावलम्बिता हि ब्रह्मविद्यायाः महर्षिणा भक्तिसूत्रकृता शाण्डिल्येनोररीचक्रे तदिदम् उभयपरताश्रयणं संज्ञैक्यं च स एवायं महर्षिः शाण्डिल्य इति प्रत्यभिज्ञापयतः।

मन्यते तु विद्यान्तरसाधारण्याद् ईदृशनिर्देशस्य पुरुषभेदेऽपि संज्ञासाम्यात् स एवायमिति वक्तुं दुष्करम्।

अपरोऽप्येकः पाञ्चरात्रप्रवर्तकः महर्षिः शाण्डिल्यो विख्यातो बभूव। अत्रापि पाञ्चरात्रप्रसिद्धबाह्ययागानुबन्धि

"तथजिः पूजायामितरेषा नैवम्" "पादोदकं तु पाद्यमव्याप्तेः" "स्वयमर्पितं ग्राह्यमविसेषात्" इति।

निरूपणेन तदयं पाञ्चरात्रप्रवर्तकः शाण्डिल्य इति। नारदमुनिरिव पाञ्चरात्रप्रवर्तको भक्तिसूत्रप्रणेतापि उपनिषदि श्रूयमाणादन्योऽपि भवितुमर्हति।

समयः –

भक्तिशास्त्रप्रवर्तकौ मुनी नारदशाण्डिल्यौ नार्वाचीनावपि तु प्राचीनावेव इत्यत्र न केषामपि शंसीतिः।

उपसंहारः – इत्थं महर्षिवर्योऽयं शाण्डिल्यः इमानि भक्तिसूत्राणि ग्रथित्वा भक्तिमार्गस्य भक्तानाञ्च महदुपकारभागिति दिक्।

१.४. ग्रन्थतालिका -

अध्यायः	आह्निकम्	सूत्राणि
१	१	०७
	२	१७
२	१	३०
	२	२९
३	१	०७
	२	१०
	योगः	१०२

१.५. नारदमुनेः परिचयः :-

प्रस्तावना :-

निःश्रेयसकामानां त्रयो मार्गाः प्रादर्शिषत अस्मत्प्राचीनैः मुनिभिः ज्ञानकर्मभक्तित्रयमिति न गुप्तं सर्वज्ञानं शेमुषीमतामत्र जगति ।

तत्र तत्तन्मार्गप्रवर्तकाः आचार्या अपि संश्रूयन्ते जनकनारदादयः । प्रातः स्मरणीयाः ये भागवतोत्तमाः विद्यन्ते ते च यथा -

प्रह्लादनारदपराशरपुण्डरीक-
व्यासाम्बरीषशुकशौनकभीष्मदाल्भ्यान् ।
रुक्माङ्गदार्जुनवशिष्ठविभीषणादीन्
पुण्यानिमान्परमभागवतान्स्मरामि ॥

तत्रास्मद्भक्तितसम्प्रदायप्रवर्तकत्वेन आचार्यो नारद एवेति समस्वरं सस्वरं जोध्रुष्यते पुराणिदधु अन्यत्र च ।

परमभागवतस्यास्य लोकप्रसिद्धभक्त्याचार्यस्य श्रीनारदर्षेः महच्चरित्रं जगत्पावकं परमादर्शभूतञ्च वर्तते । मुनिप्रवरोऽयं ज्ञानस्वरूपः, भक्तिसरित्पतिः, परमपावनप्रेमभाण्डागारः, दयासिन्धुः, सर्वभूतसुहृद्, सहजविश्वहितचिन्तकः, समस्तसद्गुणखनिः वर्तते ।

महाभारतप्रसङ्गः :-

देवर्षिः नारदः समस्तविश्वप्राणिनां देव-दानव-मानवानां समानादरभाग् वर्तते । तत्र महाभारते एकः प्रसङ्गः श्रूयते -

एकदा राजोग्रसेनः भगवन्तं श्रीकृष्णं पप्रच्छ, हे वासुदेव! नारदगुणगानेन मनुष्याणां दिव्यलोकप्राप्तिः जायते तेन ज्ञायते यन्नारदः सर्वगुणसम्पन्न इति। परं तत्र के विशिष्टाः? इति जिज्ञासाम्यहम्।

भक्तभक्त्यैकसंतोष्यः परमकारुणिकः भगवान् श्रीकृष्णः संक्षेपेण नारदगुणान् वर्णयामास तत्र प्रथमं न नारदस्य कदापि स्वचरित्राभिमानं, यच्च देहसन्तापकं भवति। अपरं तस्य शास्त्रज्ञानं भक्तिश्च च सदा अस्खलिते तेन सर्वत्र सर्वपूज्यः, च न तस्मिन् प्रेमहीनता, क्रोध, चपलता, भयदर्शनं, कदापि भवति तेनायं संपूज्यः।

न नारदवाचि कामक्रोधाविवशाद् वैपरित्यमतोऽपि सर्वार्च्यः सरलहृदयः स च अध्यात्मतत्त्वविद्, क्षमाशीलः, जितेन्द्रियः, सरलहृदयः, सत्यवादी च वर्तते तेनापि सर्वथा सममान्योऽस्ति।

विशेषतश्च तस्य मर्म दृढा भक्तिः वर्तते। शुद्धान्तःकरणञ्च वर्तते। अस्पृहः, सर्वत्र समदृष्टिः तेनापि पूज्यः वर्तते नारदः। अत एव सः सर्वमान्यः सर्वत्र समपूज्योऽस्ति। इत्थं स्वयं पूर्णपुरुषोत्तमः भगवान् स्वमुखेन स्वयं भक्त्याचार्यस्य नारदस्य गुणान् प्रशसंश।

आविर्भावः :-

अस्मिन् संसारे निखिलचराचरात्मकसृष्टौ यथा सर्वव्यापकविष्णुः संव्याप्तः, तथैव पुराणोपपुराणेतिहासधार्मिकग्रन्थेषु श्रीनारदः यथाकथञ्चिद् संव्याप्तः वर्तत एव।

श्रीमद्वाल्मिकी रामायणं समारभ्य आनारदपुराणं नारदमहिमा सर्वत्र वर्तत एव। अत्र सर्वत्र अस्यैव मनीषिणः मानसावतार दृश्यते।

भगवतः विष्णोः मानसावतारभूतोऽयं मुनिः कदा कुत्र च जनिं लेभे इत्यत्र विचारः अपेक्षितः। यथा सर्वव्यापी भगवान् विष्णुः अनादि तथैव मुनिवरोऽयं येनकेनापि प्रकारेण सर्वदा सर्वत्रावस्थित एव।

श्रीनारदः श्रीमद्वाल्मीकिरामायणे, पाञ्चरात्रशास्त्रे, महाभारते, भक्तिसूत्रे, पुराणेषु सङ्गीतज्योतिषशास्त्रेषु वर्णितः स एक एव उत भिन्न इति विचारापेक्षं वर्तते।

प्रप्रथमं हरिवंशपुराणे, नारदपुराणे, ब्रह्मवैवर्तकपुराणे, श्रीमद्भागवते प्रथमस्कन्धे (अ-१-३) इत्थं बहुत्र नारदाविर्भावः भिन्नभिन्नरीत्या तत्र तत्र प्रत्यपादि महर्षिभिः।

परमस्मच्चरित्रनायकः भक्तिसूत्रप्रवर्तकः नारदः श्रीमद्भागवतोक्तपूर्वजन्म वृत्तान्तः नारद एव वर्तते इति निर्णयः।

तस्याविर्भावः भगवतः महाविष्णोः ब्रह्मशरीरस्थप्राणेन्द्रियैः प्रचलन्कप्रारम्भे बभूव। इतः पूर्वं सः भगवत्पार्षदः च आसीत्।

पूर्वं तृतीयजन्मनि नारदः दासीपुत्रः सा च दासी कान्यकुब्जजस्थ-गोपराजद्रुमिलधर्मपत्नी कलावती नाम्नी आसीत्। यद्यपि तत्पिता द्रुमिलः तथापि नौरसः परं काश्यपनारदादुत्पत्तिरस्य अजायत।

अनेन ज्ञायते यत् ब्रह्मपुत्र नारदः, उपबर्हणगन्धर्वः, दासीपुत्रनारदः, भगवत्पार्षदनारदः क्रमशः आविर्बभूव।

नारदनामसमाख्या :-

नारदशब्दोऽयं द्वेधा विभक्तुं शक्यते ***नार द*** अत्र नारद शब्दः जलजनसमूहज्ञानवाचकः दश्च दातृद्यवनरूपः। अमरकोषे "**नारदाद्या सुरर्षयः**" पदव्याख्यावसरे श्रीरामाश्रयाचार्याः "**नारं ददाति**" नाम जलं ददाति। जलाञ्जलिभिः पितृन् तर्पयति अत एव नारद इति प्रोचुः।

अपरा व्याख्या नारं जनसमूहं द्यति खण्डयति नाशयति वा कलहेन तत्र "नुः द्यति खण्डयति नाशयति वा कलहेन तत्र "नुः इदं नारमज्ञानं द्यति ज्ञानोपदेशेन नाशयति इति नारदः, अत्र पुराणपद्यमपि समाङ्कनीयं यथा -

नारं पाणीयमित्युक्तं तत् पितृभ्यः सदा भवान्।
ददाति तेन ते नाम नारदेति भविष्यति॥

वर्णाश्रमः, निवासस्थानञ्च :-

पूर्वमेव ब्रह्मणः प्राणेन्द्रियसंभवान् नारदः न वर्णाश्रमविभागभाक् तथापि लौकिकदृष्ट्या विचारः प्रस्तूयते। वर्णः यत्र तत्र कथासु नारदस्य सम्बोधनानि ब्रह्मर्षि-विप्रादिपदानि प्रयुक्तानि दृष्टिपथमायान्ति च तस्य विचारैः कर्मभिश्च ब्राह्मणवर्णीयोऽयमिति प्रतिभाति।

आश्रमः -

इत्थं वर्णे सिद्धे नाश्रमसिद्धिः दुर्लभा। मनुमहाराजेन चात्र "**अनाश्रमी न तिष्ठेत्**" अतः ब्राह्मणस्तु नाश्रमहीनः भवेदित्यर्थः। तत्रोत्तरञ्च ब्रह्मचर्याश्रमी नारदमुनिरिति मतं नानुचितमिति प्रतिभाति। अविवाहितत्वान्न गृहस्थाश्रमसंभवः।

महाभारते शान्तिपर्वणि ३४६ अध्याये श्रूयते यदयं नरनारायणदर्शनार्थं तदाश्रमे सहस्रवर्षाणि उषित्वा भगवद्गुणानुवादं श्रुत्वा निजावासभूतं नगाधिराजं हिमालयं ययौ इति। अनेन प्रमाप्यते यदस्य निवासस्थानं हिमालय एवेति।

रचना :-

अनेन महर्षिणा रचितेषु ग्रन्थेषु भक्तिशास्त्राणि, भागवतधर्माः, पाञ्चरात्रागमः, ज्योतिषग्रन्था, सङ्गीतग्रन्था दृश्यन्ते।

महर्षिवर्षोऽयं श्रीमद्भागवतस्य मूलप्रवक्ता, श्रीमद्वाल्मीकिरामायणस्य मूलाचार्यः वर्तते।

नारदसंहितायाञ्च -

"**नारदः शौनको भृगुः**" (ना. सं. अ. १, पद्य-२) अत्र ज्योतिषप्रवर्तकत्वेन श्रूयते मुनिवरोऽयम्। अस्य त्रयोऽपि सिद्धान्तस्कन्धहोरेति स्कन्धाः प्राप्यन्ते। तत्र नारदसिद्धान्तः १८७ पद्यबद्धः प्राप्यते। आर्षसिद्धान्तः सूर्यसिद्धान्तो वा १४ अध्यायेषु अधिकारेषु ५०० पद्यात्मको प्राप्यते।

उपसंहारः :-

नारदमुनिवरोऽयं भारतीयशास्त्रेषु धर्मशास्त्रेषु सर्वत्र दृश्यते अस्यैव राजनीतिज्ञानेन राजा युधिष्ठिरो बभूव। अस्यैव ज्ञानेन शिवपार्वत्योः विवाहसंभावना शक्या बभूव। भारतीयशास्त्रेषु यदि नारदोक्तं न गणयामस्तर्हि शास्त्राण्यपि तानि अल्पान्येव च इति दिक्।

नारदभक्तिसूत्राणि

सारगर्भितानि नारदसूत्राणि त्र्यशीति ८३ संख्याकानि "**अथातो भक्तिं व्याख्यास्यामः**" इत्यारभ्य "**स प्रेष्ठं लभत**" इत्यन्तानि सन्ति।

१.६. सूत्राणामध्ययनम् :-

अत्र शाण्डिल्यभक्तिसूत्राणि त्रिषु अध्यायेषु विभक्तानि सन्ति तत्र प्रथमाध्याये शास्त्रवाक्यानां समन्वयात् समन्वयाध्याय इति आख्या।

द्वितीयेऽध्याये परागौणीभक्तिं विवर्ण्य गौणी परायै परा च जिज्ञासूनां लक्ष्यभूतेति दर्शनात् साधनाध्याय इत्यभिधा।

तृतीये च अनुरागः फलमिति दर्शनात् फलाध्यायेति समाख्या कृता वर्तते।

सूत्रम् :-

१.७. अथातो भक्तिजिज्ञासा (१.१.१ शा. सू.)

भावः :-

कर्मिणां न कर्मानुष्ठानैः विदुषां न शुष्कचर्चाभिः प्राप्यते। अतः ते अत्र किमपि न्यूनमिति जानन्तः, परमात्मनः प्रीतिं विना अन्यत्सर्वं जडमिति मन्यमानाः, भक्तिं जिज्ञासन्ते।

अथ- अतः, भक्तिजिज्ञासेति पदत्रयं तत् भक्तेः जिज्ञासा इति भक्तिजिज्ञासेति कर्मणि षष्ठीत्वात् भक्तिरेकैव जिज्ञास्या नान्यत् किमपीति ।

समन्वयः :-

श्रीमत्सत्सङ्गिजीवनस्य प्रथमप्रकरणे द्वात्रिंशत्तमाध्याये तृतीयपद्ये माता भक्तिः श्रीहरिं जिज्ञासति अज्ञानस्य निवृत्त्यर्थं उत्तमं साधनं किमिति तस्यां जिज्ञासमानायां भगवान् श्रीहरिः प्राह-

युक्ताङ्गैस्तु स्वधर्माद्यैः त्रिभिः भक्तिः महाव्रते ।
क्वापि केनापि विघ्नेन नैवेह प्रतिहन्यते ।

इत्यनेन भक्तेरेव जिज्ञासा वरा, सा न अन्येन केनापि विघ्नेन प्रतिहन्या न भवति अतः अथातो भक्तिजिज्ञासा सूत्रमिदं संगच्छतेऽत्र ।

श्रीमद्भागवते दशमस्कन्धे चतुर्दशाध्याये पञ्चमे पद्ये भक्तिजिज्ञासा दृश्यते ब्रह्मणः । ब्रह्मा श्रीकृष्णं स्तौति-

त्वदर्पितेहा निजकर्मलब्धया
विबुध्य भक्त्यैव कथोपनीतया
प्रपेदिरेऽञ्जोऽच्युत ते गतिं पराम् ॥

(१०, १४, ०५)

अत्र ब्रह्मा योगिनामपि भक्तिजिज्ञासयैव परां गतिं प्रतिपादयामास ।

अतः उभयत्र भक्तिजिज्ञासा दृश्यते एव इत्थञ्चात्र उभाभ्यां ग्रन्थाभ्यां भक्तिसूत्रस्यास्य सम्बन्धः दृढीयान् वर्तते ।

सूत्रम् :-

१.८. सा परानुरक्तिरीश्वरे ॥ १-१-२ ॥

भावः -

शाण्डिल्यमुनिना अनेन द्वितीयेन सूत्रेण भक्तेः स्वरूपं प्रत्यपादि । सा परा अनुरक्तिः ईश्वरे इति चतुष्पदात्मकं सूत्रमिदं वर्तते ।

यदा मानवस्य संसारेऽरत्तिः तदैव भगवति रतिः साऽपि न सामान्या अपि तु परा नाम श्रेष्ठा सैव भक्तिरित्युच्यते ।

समन्वयः :-

श्रीमत्सत्सङ्गिजीवनस्याद्ये प्रकरणे सप्तविंशेऽध्याये त्रिंशत्तमे पद्ये सूत्रस्यास्य समन्वयः दृष्टिपथं विभूषयति यथा -

स बालः शैषवेऽप्यासीत् साधुशीलगुणान्वितः ।
कृष्णार्चादिरुचिः त्यक्तग्राम्यक्रीडापरिच्छदः ॥
(१-२७-३०)

अत्र मानुषधृतदेहः श्रीहरिः श्रीकृष्णभक्तावेव रुचिं दधौ न ग्राम्यसुखादिष्विति । अतोऽत्र भगवति बालघनश्यामस्य परोऽनुरागः दृश्यते, जगति तथा न । तेन सङ्गच्छते पद्यमिदं सूत्रेणानेन सार्द्धमिति ।

श्रीमद्भागवते च नेत्रसङ्ख्याके स्कन्धे कपिलोऽचकथत्

मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये ।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ ॥
तृतीयस्कन्धः

स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः ।
येनातिव्रज्य त्रिगुणं मद्भावायोपपद्यते ॥

सर्वान्तर्यामिणि मयि प्रत्यक्षे फलानुसन्धानरहिता निष्कामा या भक्तिः तत्र गाढस्नेहेन तदाकारतापत्तिः जायते ।

तथा च तत्रैव ब्रह्मणा नारदं प्रति द्वितीयस्कन्धे सूत्रसमन्वयः प्रादर्शि –

न भारती मेऽङ्ग मृषोपलक्ष्यते न वै क्वचिन्मे मनसो मृषा गतिः ।
न मे हृषिकाणि पतन्त्यसत्पथे यन्मे हृदौत्कण्ठयवता धृतो हरिः ॥
०२-१३-३२ – द्वितीयस्कन्धः

श्रीमद्भागवत एव एकादशे हरियोगेश्वरेण जनकं प्रति न्यगादि –

त्रिभुवनविभवहेतवेऽप्यकुण्ठस्मृतिरजितात्मसुरादिभिर्विमृग्यात् ।
न चलति भगवत्पदारविन्दाल्लनिमिषार्धमपि स वैष्णवाग्र्यः ।

नाम निष्कामः भक्तः एव वैष्णवोत्तमः वर्तते न सकामः ।

इत्थं सूत्रमिदं सङ्गच्छते एतैः श्रीमद्भागवतोक्तवचनैः सहेति दिक् ।

सूत्रम् :-

१.९.तत्संस्थस्यामृतत्त्वोपदेशात् ॥ १-१-३ ॥

भावः –

तस्मिन् परमेश्वरे सम्यगनुरागपूर्वं वर्तनं भक्तिः, सा यस्य अस्ति तस्य अमृतत्वलाभः नाम मुक्तिर्जायते इत्युपदिष्टं भवति वेदादिशास्त्रेषु ।

समन्वयः –

श्रीमत्सत्सङ्गिजीवनस्य तृतीयप्रकरणे एकोनत्रिंशत्तमेऽध्याये मुक्तानन्दनामा मुनिः

भगवति दृढानुरागपूर्वंक भक्त्या परमां मुदमाप। स साधुसंरक्षणाय पृथिव्यां दिव्यनराकाररूपेण प्रकटिते तस्मिन् नारायणमुनौ निर्मलां बुद्धिं लेभे। भगवतो नैकट्यसहवासात् सदा सत्सङ्गात् तस्य परां भक्तिमवाप्य अस्मिन् लोके इप्सितं अवाप्य परलोके मुक्तिसुखमनुभवति भक्तः। उक्तञ्च–

स्वरूपाद्वैतं यः पठति च श्रृणोतीह विमलं
परं ज्ञानं नारायणमुनिमुखान्निः सृतमिदम्।
प्रभौ तस्मिन् भक्तिंपरमसुखरूपे स परमां
स भुक्तिं मुक्तिं चेप्सितमखिलसौख्यं च लभते॥

तृ. प्र. २९-१४६

श्रीमद्भागवते च साङ्ख्यशास्त्रप्रवर्तककपिलमुनिना प्रोक्तञ्च मम मायया विरचितां विभूतिं, अष्टाङ्गयोगजं, समग्रमैश्वर्यं च सायुज्यादिमुक्तिमपि मम परमभक्ताः न कामयन्ते परं मेऽक्षरलोकं लभन्ते।

इत्थमत्र भगवदनुरागेण अमृतत्वलाभ उभयत्र सिद्धः।

सूत्रम् :-

१.१०. ज्ञानमिति चेत्तद् द्विषतोऽपि॥ १-१-४॥

भावः -

मानवः स्वकल्पनया वस्तुसम्बन्धेन ज्ञानमनुमिनोति तत्र अन्तःकरणस्थाः त्रयो गुणाः स्वयमेव संयुक्ताः भवन्ति। अतः ज्ञानात् बुद्धेः वा पारे यत्स्वाभिवकमाकर्षणं सैव अनुरागभक्तिः। ईश्वरजीवयोरभिन्नत्वात् जीवस्य आकर्षणमीश्वरं प्रति सहजं परं बुद्ध्या तत्र विघ्नजननम्। अत बुद्धिर्वा ज्ञानमु पकारकं न मूलमिति प्रकाशाय सूत्रमिदं जग्रन्थ शाण्डिल्यमुनिः।

अत्र ज्ञानशब्दार्थः पाण्डित्यार्दो प्रयुक्तः तत्सत्वेऽपि नानुरागसत्वं परं तत्त्वसत्त्वे भक्त्युद्गमो दुर्लभ एव।

समन्वयः -

श्रीमत्सत्संगिजीवने कौलाचारवताञ्च भगवद्द्वेषिणां श्रीमद्भागवते च दशमे स्कन्धे कंसादीनां ज्ञानसत्वेऽपि "**यदयं भगवानिति**" न तत्र भक्तिः दृश्यते। तेन सूत्रमिदं तत्र सङ्गच्छते।

सूत्रम् :-

१.११. तया ज्ञानादीनामुपक्षयात्॥ १-१-५॥

भावः -

तया भक्त्या ज्ञानवैराग्यकर्मणां समावेशः जायत एव ।

सर्वशास्त्रप्रतिपादिताः ज्ञानवैराग्यादयः सिद्धभक्त्या उपशाम्यन्ति तेनैव भिन्नभिन्न कलारम्भेण न योग्यतावाप्तिः । मुक्तेस्साक्षात्कारणन्तु भक्तिरेव यतो हि भक्तिमति पुरुषे ज्ञानवैराग्यदिकं भवत्येव खलु । तेन भक्त्या ज्ञानाद्युपक्षयः प्रोक्तः सूत्रकारेण ।

समन्वयः -

श्रीमद्भागवते ज्ञानकर्मादिभ्यः भक्तेरेव ज्यायस्त्वं श्रीव्यासेन पिपादयिषया

नैष्कर्म्यमप्यत्त्युतभाववर्जितं
न शोभते ज्ञानमलं निरञ्जनम् ।

श्रीमद्भा-०२-२६-३४

अपि च

आत्मारामाश्च मुनयो निर्ग्रन्था: अप्युरुक्रमे ।
कुर्वन्त्यहैतुकी भक्तिं इत्थंभूतगुणो हरिः ॥

श्रीमद्भा-०३-२०-३२

तथा च

वर्णाश्रमवतां धर्मः एष आचारलक्षणः ।
स एव मद्भक्तियुक्तो निःश्रेयसकरः परः ॥

श्रीमद्भा-०४-११-२१

इत्यादिभिः प्रत्यपादि ।

सूत्रम् :-

१.१२. हेया रागत्वादिति चेन्नोत्तमास्पदत्त्वात् । ०२-०१-०४

भावः -

परानुरागा भक्तिः मुमुक्षुभिः त्याज्या न सर्वदानुसर्तव्या रागरूपत्वादिति चेन्न यतो हि उत्तमाश्रया सा । अनर्थदः राग एव त्याज्यः नोत्तमाश्रयः रागः त्याज्यः । परमात्माच न कस्मादपि अनुत्तमः सर्वोत्तम एव । परमनिःश्रेयससिद्धिरपि परमात्मप्राप्त्यैव भवति । सा च सेवान्ता एव । नाम सा सेवैव मुक्तिः।

समन्वयः -

भक्तः येन केनापि भावेन श्रीकृष्णे मनः सोयोजयति, सः तन्मयतां प्राप्नोतीति स्वयं पूर्णपुरुषोत्तमेन दशमे स्कन्धे न्यगादि ।

न मय्यावेशितधियां कामः कामाय कल्पते ।
भर्जिताः क्वथिताः धानाः प्रायो बीजाय नेष्यते ॥

श्रीमद्भा–१०–२३–०५

सप्तमस्कन्धे च मुनिना नारदेन युधिष्ठिरं प्रति न्यगादि –

गोप्यः कामाद्भयात्कंसः द्वेषात्त्चैद्यादयो नृपाः ।
सम्बन्धाद् वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो ॥

श्रीमद्भा–०७–०८–२२

अत्र सर्वत्र भगवतः सर्वोत्तमत्वं प्रतिपाद्य भगवच्छरणमेव शरणं समेषामिति सिद्ध्यति।

सूत्रम् :-

१.१३. बुद्ध्यानन्त्यात् ॥२-१-११॥

भावः –

जीवस्य मुक्तिदशायां न परब्रह्मभावः परं बुद्धेरेव विकासः। कर्मणा संकुचितं जीवात्मनः ज्ञानं तत्कर्मापाये सर्वत्र प्रसरति तेनैव जीवात्मा सर्वज्ञत्वादिगुणैः परमात्मनः, साम्यं लभते। इत्थं मुक्तानां प्रति इश्वरैश्वर्यं सदा सर्वदा सिद्धमेव भवति।

यथा सुवर्णं अग्नौ प्रतप्यते अन्ते च शुद्धं सुवर्णमवतिष्ठते तथैव जीवस्य परमात्मनः उपासनां कुर्वतः स्वस्वरूपाविर्भावपूर्वकं तस्य साक्षादनुभव एव मुक्तिः कथ्यते।

समन्वयः –

श्रीमद्भागवते तृतीयस्कन्धे एतदेव लक्षीकृत्य अण्डानां तद्गतजीवानाञ्च आनन्त्यं प्रादर्शि व्यासमहर्षिणा –

विकारैः सहितो युक्तैः विशेषादिभिरावृतः ।
आण्डकोशो बरिहयं पञ्चाशंत्कोटिविस्तृतः ॥
दशोत्तराधिकैर्यत्र प्रविष्टः परमाणुवत् ।
लक्ष्यतेऽन्तर्गताश्चान्ये कोटिशो ह्यण्डराशयः ॥
तदाहुरक्षरं ब्रह्म सर्वकारणकारणम् ।
विष्णोर्धाम परं साक्षात् पुरुषस्य महात्मनः ॥

श्रीमद्भा–०३–१२–३१,३३

तत्रैव षष्ठस्कन्धे –

यत्र पतत्यणुकल्पः सहाण्डकोटिकोटिभिः ।

तदनन्त .... ॥

श्रीमद्भा-०६-१०-२२

इत्थं सूत्रमिदं सङ्गच्छते पूर्वोक्तभावैः इति दिक्।

सूत्रम् :-

१.१४. तत्परिशुद्धिश्च लिङ्गेभ्यो गम्या लोकवत् ॥ २-१-१८॥

भावः -

तस्याः भक्तेः परिशुद्धिः हि चिह्नैः ज्ञेया यथा लोके ज्ञायते तद्वत्।

भक्तेः परिशुद्धिः नाम अन्यप्रयोजनं विनापि रसघनता परानुरागभक्तेः परा काष्ठा अन्तिमावस्था एव।

चिह्नैः नाम भगवन्नामोच्चारणकाले भजनपूजनसमये कथाश्रवणकाले रोमाञ्चः, हृदयद्रावः, अश्रुबिन्दुपतनं, हसनं, रुदनं, उच्चैः गानम्, नृत्यम् इत्यादिभिः ज्ञेया इति।

यथा लोके प्रियपात्रस्य स्मरणं कुर्वत्याः प्रियतमायाः, पुलकितगात्रै नायके प्रेमातिशयः ज्ञायते तथैव भक्तानां चिह्नैः भगवद्रतिः ज्ञायते।

समन्वयः -

श्रीमद्भागवते बहुत्र भावोऽयं प्रादर्शि श्रीव्यासेन यथा -

शृण्वन्सुभद्राणि रथाङ्गपाणेः जन्मानि कर्माणि च यानि लोके ।

गीतानि नामानि तदर्थकानि गायन्विलज्जो विचरेदसङ्गः ॥

अपि च तत्रैव

एवंव्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः ।

हसत्यथो रोदिति रौत्ति गाय त्युन्मादवन्नृत्यति लोकबाह्यः ॥

श्रीमद्भा-१०-२३-३२

श्रीनारदमुनिः तत्रैव सप्तमस्कन्धे प्रह्लादं एवं विधं वर्णयन्नाह —

न्यस्तक्रीडनको बालः जडवत्तन्मनस्तया

कृष्णग्रहगृहीतात्मा न वेद जगदीदृशम् ।

आसीनः पर्यटन्नश्नन् शयानः प्रपिबन् ब्रुवन्

नानुसन्धत्त एतानि गोविन्दपरिरम्भितः ॥

श्रीमद्भा-०७-१६-३३

श्रीमत्सत्संगिजीवने च तृतीयप्रकरणे अष्टादशेऽध्याये सर्वे जना तुष्टुवुः श्रीहरिम् यथा -

वागस्माकं गायतु नित्यं गुणजातं कर्णौ नित्यं नाथचरित्रं श्रृणुतां ते ।
चक्षुर्नित्यं पश्यतु मूर्तिं तव लोके रूपं ह्येतद्ध्यायतु नित्यं च मनो नः॥

॥३-१८-३१॥

बहुशः सम्मानादिकचिह्नैरपि भक्तिरनुमेया भवति इति सूत्रार्थः । इत्थमुभयत्र सूत्रस्यास्य सङ्गतिः सुस्पष्टैवेति दिक् ।

सूत्रम् :-

१.१५. सम्मानादिभ्यो बाहुल्यात् ॥२-१-११॥

भावः -

अत्र सूत्रे आदिपदेन बहुमानप्रीति-विरह-इतरविचिकित्सा-महिमख्याति-तदर्थ-प्राणस्थान-तदीयता-सर्वतद्भाव-अप्रातिकूल्यादिनां बोधः भवति ।

ईश्वरं प्रति सम्मानस्य भावना, सर्वतोपरिश्रेष्ठता, बहुमानस्य भावना, बहुस्नेहभावः, तं विहाय नान्यचर्चा, सदैव तस्यैव महिम्नः, गानम्, तदर्थमेव प्राणधाराणम्, तदधीनता, सर्वत्र तद्भावः, तस्य प्रतिकूलाचरणवर्जनम्, इत्याद्याः भक्तिप्रकाशाः स्पष्टं दृष्टिपथमायान्ति ।

समन्वयः -

श्रीमत्सत्सङ्गिजीवने तृतीयप्रकरणस्याद्ये अध्याये अभयभूपकथानकं सङ्गच्छतेऽत्र -

सम्पूर्णसर्वस्वमनोरथोऽथ जरन्नृपो भौतिकदेहमूर्जे ।
विहाय दिव्यं प्रतिपद्यदेहं तद्धामगोलोक्मवाप भूप ॥

॥३-१-२॥

ततश्च तत्पुत्रः उत्तमराजः -

नृपासनस्थोऽपि स दास्यमेव स्वयं हरेश्चास्य सतां मुदैव ।
प्रीत्या चकारानुदिनं विनीतः श्रीकृष्णनिघ्नीकृतराज्यभारः

॥३-१-४॥

अत्र राज्ञोऽस्य भगवद्दर्शने एव दत्तमनसः प्रीत्या मुदा इत्यादिभिः पदैः चिह्नभूतैः परा भक्तिः दृश्यते ।

श्रीमद्भागवते च दशमक्सन्धे पाण्डवानां भगवन्तं प्रति स्नेहः यथा -

दृष्ट्वा तमागतं पार्था मुकुन्दमखिलेश्वरम् ।
उत्तस्थुर्युगपद्वीराः प्राणा मुख्यमिवागतम् ॥

श्रीमद्भा-१०-४३-२५

अत्र पाण्डवानां सम्मानः दृश्यते। अतिस्नेहश्च गोपाङ्गनानां यथा –

क्षणं युगशतमिव यासां येन विनाभूत् ॥

श्रीमद्भा –१०–३३–४५

यत्प्रेक्षणे दृशिषु यक्ष्मकृतं शयन्ती ॥

श्रीमद्भा–१०–२३–२१

प्रीतिश्च विदुरस्य तत्रैव –

या नः प्रीतिः युष्कराक्ष ! त्वद्दर्शनसमुद्भवा ।
सा किमाख्यायते तुभ्यं अन्तरात्मासि देहिनाम् ॥

श्रीमद्भा–१०–४६–४३

एवमत्रोभययत्र सूत्रमिदं सर्वथा सर्वरूपेण समन्वयं लभते इति दिक्।

सूत्रम् :-

१.१६. द्वेषादयस्तु नैवम् । ०२–०१–२०

भावः –

ननु द्वेषादयोऽपि भक्तिसूचकाः? यतो हि शिशुपालादयः द्वेषिणोऽपि मुक्तिं लेभिरे। तन्निरासायय सूत्रमिदमवतारयति शाण्डिल्यमुनिः।

न द्वेषादयो भक्त्यनुमापकाः जायन्ते कदापि। न द्वेषादिना भक्तिरनुमातुं शक्या।

समन्वयः –

श्रीमद्भागवते श्रीव्यासेनोक्तं यत् न भक्तानां द्वेषादिसम्भवः –

तिरस्कृता विप्रलब्धाः शप्ताः क्षिप्ता हता अपि ।
नास्य तत्प्रतिकुर्वन्ति तदभक्ता प्रभवोऽपि हि ॥

श्रीमद्भा–१०–५४–२३

अपि च

प्रायशः साधवो लोके परैर्द्वन्द्वेषु योजिताः ।
न व्यथन्ति न हृष्यन्ति यत् आत्मगुणाश्रयः ॥

श्रीमद्भा–१०–३२–१६

ये उत्तमाः भक्ताः ते न कदापि अन्यैः दुःखमवाप्ता अपि व्यथिता भवन्ति। यतो हि तदाश्रयः साक्षात् श्रीहरिः भवति।

श्रीमत्सत्सङ्गिजीवने च तृतीये प्रकरणे चतुर्दशेऽध्याये–

गालिदानं कुमतिभिः कृतं क्षम्यं ॥

श्रीमत्सत्संगि-०३-४४-२५

इत्यादिना भक्तानां प्रतिकाराभावः उपदिष्टः भगवता स्वयं स्वमुखेन । इत्थमत्र भक्तानां द्वेषाद्यभावः स्फुटति स्फुटमेवेति दिक् ।

सूत्रम् :

१.१७. तद्वाक्यशेषात् प्रादुर्भावेष्वपि सा ॥२-१-२१॥

भावः-

अवतारविषयकवाक्यस्य अवशेषत्वात् प्रादुर्भावेष्वपि भक्तिः ज्ञेयेति भावः ।

अवतारेषु अवतारिण एवैश्वर्यं नेत्रपथिकायते तथैव अवतारिणः कर्तव्यमपि तत्र दृश्यते तेन च नावताराणामवतारितः भेदः ।

समन्वयः -

श्रीमद्भागवते दशमस्कन्धे गोपीभिः रामवामनरसिंहावतारधारित्वं श्रीकृष्णस्य न्यगादि - यथा

मृगयुरिव कपीन्द्र विव्यधे लुब्धधर्मा
स्त्रियमकृत विरूपां स्त्रीजितः कामयानाम् ।
बलिमपि बलिमत्वा वेष्टयद्ध्वाङ्क्षवद्यः
तदलमसितसख्यैः दुस्त्यजस्तत्कथार्थः ॥

श्रीमद्भा-१०-३३-४१

तत्र प्राणभूते दशमक्सन्धेऽक्रूरेणापि मत्स्याद्यवतारधारणं कृष्णस्यैव अकथि

यानि यानीह रूपाणि क्रीडनार्थं बिभर्षि हि ।
तैरामृष्टधियो लोका मुदा गायन्ति ते यशः ॥

श्रीमद्भा-१०-५६-४८

श्रीमत्सङ्गिजीवने च

मत्स्यं कूर्मं वराहं कपिलमथ हरिं वासुदेवं च वैन्यं
दत्तात्रेयं च हंसं नरहरिमृषभं वामनं पर्शुरामम् ।
यज्ञं रामं कुमारं हयशिरसमथो नारदं राजराजम्
व्यासं कृष्णं च पूर्णं धृतनरवपुषं नौमि नारायणं त्वाम् ॥

श्रीमत्सत्संगि-०३-६५-५५

अतः अविर्भावविषया भक्तिरपि तस्यैव कृष्णस्य इति ज्ञेया ।

इत्थमनयोः ग्रन्थयोः समन्वयात् सूत्रमिदं सङ्गच्छते सर्वथा इति दिक् ।

सूत्रम् :-

१.१८. जन्मकर्मविदो जन्माभावः इति ॥२-१-२२॥

भावः-

भगवतो यो भक्तः जन्म कर्म च दिव्ये वेत्ति तस्य पुनर्जन्म न विद्यते। भगवान् कथं प्रादुर्बभूव भवति वा तथा कथं कर्माणि करोति चकार वेति ज्ञानं अतिदुर्लभं तेन न सामान्यानां सुलभं तत्।

भगवतो जन्मकर्माणि न लौकिकानि अपि तु अलौकिकानि तेन लौकिकभावेन सर्वथा न ज्ञातव्यानि अपि तु अलौकिकभावेनैव ज्ञेयानि तानीति।

समन्वयः -

श्रीमद्भागवते श्रीव्यासो वक्ति यत् —

एवं जन्मानि कर्माणि ह्यकर्तुरजनस्य च।
वर्णयन्ति स्म कवयो वेदगुह्यानि हृत्पतेः॥
जन्मगुह्यं भगवतो य एतत् प्रयतो नरः।
सायं प्रातर्गृणन् भक्त्या दुःखग्रामाद्विमुच्यते॥

एतेन श्रीकृष्णे तदवतारेषु च न भेदः इति फलति।

श्रीमत्सङ्गिजीवने च कृष्णः कृष्णावताराश्च ध्येया तत्प्रतिमापि च। इत्युक्त्वा श्रीकृष्णे तदवतारेषु न भेद इति राद्धान्तितम् वर्तते।

सूत्रम् :-

१.१९. तच्च दिव्यं स्वशक्तियात्रोद्भवात् ॥२-१-३॥

भावः-

भगवतः जन्मकर्मणां दिव्यत्वं स्वशक्तिसंकल्प मात्रजनित्वात्।

या ज्ञातुः जन्मकर्मणामभावोक्लतः ते जन्मकर्मणी दिव्येऽप्राकृते स्तः। तेनैव तयोः विज्ञानं भक्तानां जन्ममरणनिवृत्तये प्रभवति।

तद्दिव्यं कथमिति चेत् स्वशक्तिसमुद्भवात् मात्रपदेन कर्मव्यावृत्तिः अत्र उद्भवश्च आविर्भावः बोध्यः। स्वातिशयदिव्यस्वरूपेनैव तत्तत्संस्थानं आकृतिरूपं दधत् स्वेच्छयाविर्भवति।

अतः अवतारेषु भक्तिः मुक्तये भवत्येव।

समन्वयः -

भगवतः स्वरूपैक्यप्रकरणे सत्सङ्गिजीवने द्वितीयप्रकरणे प्रथमाध्याये त्रयोविंशतितमे पद्ये उक्तञ्चैतत् —

दिव्यं कृष्णस्य रूपं भवति च सततं तस्य लोकोऽपि दिव्यः
दिव्या भोगाश्च भोग्यान्यपि च भगवतस्तस्य दिव्यानि सन्ति ।
दिव्या वै पार्षदाश्च प्रकटितनृतनोः शक्तयस्तस्य दिव्या
दिव्या भक्ताश्च सर्वे जगति यदुपतेः सन्ति दिव्याः क्रियाश्च ॥

– २–१–२३

श्रीकृष्णः परं ब्रह्म परात्परः, नारायणः, विष्णुः, पुरुषोत्तमः, वासुदेवः, परमेश्वरः, कालप्रकृति नियामक, स्वतन्त्रः दिव्यविग्रहः वर्तते । अतस्तत्र न भेदः ज्ञेयः । श्रीमद् भागवते च –

"तमद्भूतं बालकमम्बुजेक्षणम् ।"

इत्यत्रापि अद्भूतं अलौकिकं स्वेच्छाधृतमेव परमात्मस्वरूपं न भेदः तत्र इति बुद्ध्यतेऽस्माभिः ।

सूत्रम् :-

१.२०. वासुदेवेऽपि तुल्यमिति चेन्नाकारमात्रत्वात्तस्य । ।२–१–२७॥

भावः –

ननु वासुदेवकल्पः श्रीकृष्णोऽपि अभजनीयः स्यात् विभूतित्वात् ? तन्निरासाय सूत्रमिदं समादधाति ।

यदि विभूतिरभज्या तर्हि वासुदेवे कृष्णेऽपि अभजनीयत्वसमानम् इति चेन्न । स तु जगदुपकारणकरणचित्तः मर्त्यभावमवाप तथापि न स्वमूलस्वभावत्यागी च एतादृशः परमात्मा जीवाश्रययोग्यतावाप्तये एव मनुष्यदेहं दधाति ।

समन्वयः –

श्रीमद्भागवते दशमे स्कन्धे ब्रह्मा स्वयं गोपीस्नेहं दृष्ट्वा बभाण–

अहो भाग्यमहोभाग्यं नन्दगोपव्रजौकसाम् ।
यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम् ॥

श्रीमद्भा–१०–४८–२५

अत्र नाकारसाम्येन साम्यं गोपीनां परमात्मनश्च परं गोप्यः भाग्यवत्यः यतो हि पूर्णं ब्रह्म तासां सख्यं लेभे ।

तथैव सत्सङ्गिजीवने तृतीये प्रकरणे एकोनषष्ठितमाध्याये —

ब्रह्मस्वरूपमात्मानं सम्प्राप्यैव समाधिना ।
नारायणं परं ब्रह्म ये च साक्षादुपासते ॥

३–५९–३४॥

नारायणरूपमवाप्यापि सन्तः सदा सर्वदा तस्यैवोपासनां चक्रिरे तेन न तत्स्वरूपावाप्तावपि देहैकता संजाघटीति।
इत्थमत्र अनयोः समन्वयः सम्यक् सञ्जायते।

सूत्रम् :-

१.२१. स्मरणकीर्तनादीनां पापनाशे प्रायश्चित्तभावात् ॥२-२-१९॥

भावः-

स्मरण-कीर्तन-श्रवण-पादसेवन-अर्चन-वन्दन-दास्य-सख्य-आत्मनिवेदनभक्तीनाम् अघनाशे सर्वथा प्रायश्चित्तभावः वर्तते।
भगवत्कीर्तनश्रवणादिभक्तेः पापप्रणाशे प्रायश्चित्तभावः सिद्ध्यति तेन प्रसङ्गता, पूर्वागन्तुकपाप्नां समूलं विनाशकरणे प्रायश्चित्तभावः तदर्थञ्च स्मृतेः वचनानि प्रमाणभूतानि यथा-

प्रायश्चित्तान्यशेषाणि तपः कर्मात्मकानि वै।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥

समन्वयः -

सर्वपुराणसारभूतपुराणे श्रीद्भागवते द्वादशे स्कन्धे अन्तिमे पद्ये सूत्रस्यास्य भावः श्रीव्यासेन सम्यक् प्रस्फोटितः - यथा -

नामसङ्कीर्तनं यस्य सर्वपापप्राणाशनम्।
प्रणामो दुःखशमनः तं नमामि हरिं परम् ॥

१२-३१-५६॥

इत्यत्र श्रीमद्भागवतसन्दोहरूपेण व्यासेन नामसङ्कीर्तनभक्तेः प्राधान्यमुररीकृत्य पुराणसमाप्तिः, व्यधायि। सत्सङ्गिजीवने च

"**कार्यः कृष्णमनोः जपः**" ०४-४४-१०४

इत्यनेन सूत्रस्यास्यैव भावः प्रकटीकृतः वर्तते।
एवमत्र समन्वयः जायते सूत्रस्यास्य उभाभ्यां ग्रन्थाभ्यामिति दिक्।

सूत्रम् :-

५.१.२२. **अतो हि विपक्वभावानां तल्लोके तदाचरणम्** ॥२-२-४॥

भावः -

तस्मादेव कारणात् विपक्वभाववतां तस्मिन् तस्मिन् लोके भक्तेराचरणं श्रूयते।
भक्तौ सर्वेषामस्त्यधिकारः तेन हेतुना काम-क्रोध-लोभ-मान-मोहादिनष्टानां भाववता मनुष्यलोकक्वभक्तेराचरणं श्रीशुकदेवस्य ऋषभदेवतनयस्य भरतस्य वामदेवादिकस्य

बदरिकाश्रमे उद्धवादिकस्य, श्वेतद्वीपे निरन्नमुक्तानां स्वर्गलोके नारदसनकादीनां पुराणादिग्रन्थेषु श्रूयते।

समन्वयः :-

पुराणप्राणभूते श्रीमद्भागवते प्रथमे स्कन्धे श्रीव्यासेन ऊचे

आत्मारामाश्चमुनयःनर्ग्रन्था अप्युरुक्रमे ।
कुर्वन्त्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिः॥

श्रीमद्भा-०१-१६-३४

अत्रायं भावः आत्मन्येवआराममंमन्यमानाः सर्वानन्दसीमावन्तः मुनयः काम-क्रोधादिविजीता अपि भगवति अहैतुकी भक्तिं कुर्वन्ति।

अतः विपक्वभावा मुनयः सिद्धा अपि भक्तेराचरणमवश्यं विदधत्येव।

सत्सङ्गिजीवने स्वयं श्रीहरिः, सर्वकर्मस्वतन्त्रोऽपि भक्तिसंपोषणाय मातुः प्रेमवत्याः ज्ञानं प्रदाय तस्याः श्रद्धादिकं चकारेति द्वीतीये प्रकरणे पञ्चत्रिंशाध्याये दृश्यते।

तेन सङ्गच्छते सूत्रमिदं ग्रन्थाभ्यामुभ्यामिति दिक्।

सूत्रम् :-

१.२३. भजनीयमिदमद्वितीयं कृत्स्नस्य तत्स्वरूपत्वात् ॥३-१-१॥

भावः -

उपास्यमिदमेकमेव स्वरूपं राराजते, सर्वस्य तत्स्वरूपत्वात्।

यदि केनाप्युपास्यं स्वरूपं तर्हि तदेकमेव श्रीकृष्णस्य नान्यत् किञ्चन। अन्यत्रोपास्यत्वेनोङ्कताः इन्द्र अग्नि सूर्यादयः तत्स्वरूपा एव।

समन्वयः -

श्रीमद् भागवते उक्तञ्च-

नारायणपरा वेदाः देवा नारायणाङ्गजाः ।
नारायणपरा लोकाः नारायणपरा मखाः ।
नारायणपरो योगो नारायणपरन्तपः ।
नारायणपरं ज्ञानं नारायणपरा गतिः ॥

श्रीमद्भा-०१-०९-३३

एवञ्च यथा वृक्षस्य मूले निषेचनेन तस्य शाखाः पत्राणि फलानि सर्वाणि तुष्टानि पुष्टानि च भवन्ति तथैव एकस्यैव नारायणस्य भक्त्या उपासनया वान्यदेवताः तृप्तिमायान्ति इति ध्रुवमेव।

अत एवोद्धवसमप्रदाये-

"त्वां भक्तिधर्मतनयं शरणं प्रपद्ये"

इत्येकेनैव वाक्येन च

"सेव्यं कृष्णस्वरूपमेवैव वन्द्यमितरत्तु यत्"

इति आज्ञया एकस्यैव श्रीकृष्णस्य भक्तिरूपदिष्टा वर्तते।

एवमत्र सूत्रेण समन्वयः सुकर एव।

सूत्रम् :-

१.२४. न प्राणिबुद्धिभ्योऽसम्भवात् ॥३-१-१॥

भावः :-

ननु ब्रह्मा एव स्वार्जितपसा सृष्टिं कुर्यात् न ईश्वरापेक्षासम्भवः?

तत्र उच्यते प्राणिनां बुद्धिबलादिभ्यः ऐश्वर्येभ्यः न जगदुत्पत्तिः सम्भवा।

विनेश्वरं कस्याप्यन्यजीवस्य न जगतः कर्तृत्वसामर्थ्यसम्भवः तदेवान्तिमं तथ्यमाटीकते तथ्यकोटिम्।

समन्वयः -

श्रीमद् भागवते द्वितीये स्कन्धे ब्रह्मणा नारदं प्रति प्रावोचि -

येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहम् ।
यथाऽर्कोऽग्निर्यथा सोमो यक्षर्क्षग्रहतारका ॥
तस्यापि द्रष्टुरीशस्य कूटस्थस्याखिलात्मनः ।
सृज्यं सृजामि सृष्टोऽहमीक्षयैवाभिनोदितः ॥
सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः ।
विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृत् ॥

श्रीमद्भा-१०-२३-४६

स्वयं ब्रह्मण एव एतैः वाक्यैः तस्य परमात्मनः कृपां विना स्वातन्त्र्येण जगतोऽस्य कर्तृत्वादिकं प्रतिषिद्धमेव वर्तते। तर्हि सामान्यानां प्राणिनां तु सर्जने कथैव का।

सूत्रम् :-

१.२५. मनोऽतत्त्वव्यवहारः ॥३-२-३॥

भावः -

मनः न वास्तविकव्यवहारास्पदम्। प्राणेन्द्रियबुद्धिमनांसि एतेषां संघातरूपेण सूक्ष्मशरीरम्। तत्र मनः प्रधानम्। तच्च मनः सत्त्वरजस्तमसां संयोगेन सुकर्माणि कुकर्माणि वा कारयति तदाधारेण चोच्चनीचदेहप्राप्तिः जायते।

तेन मनसा कृत एव संसारः जीवस्य सम्पृक्तो न वास्तविकः ।

समन्वयः –

श्रीमद्भागवते पञ्चमस्कन्धे एतल्लक्षीकृत्यैव जडभरतेन रहूगणं प्रति प्रोक्तञ्चत् –

यावन्मनो रजसापुरुषस्य सत्वेन वा तमसा वानुरुद्धम् ।
चेतोभिराकूतिभिरातनोति निरङ्कुशं कुशलं चेतरं वा ॥

श्रीमद्भा–०५–१२–२१

नाम मनः केन सम्पृक्तं रजसा तमसा सत्वेन वा तथा तस्य निरङ्कुशत्वं कुशलत्वं वा ज्ञातुं शक्यते ।

तत्रैव श्रीमद्भागवते तृतीयाध्याये तृतीये पद्ये –

चेतः खल्वस्य बन्धाय मुक्तये चात्ममनो मतम् ।
गुणेषु सक्तं बन्धाय रतं वा पुंसि मुक्तये

॥३–२–३॥

सत्सङ्गिजीवने च

चित्तं चन्तय चारुचरित्रम् ॥३–६–८॥

इत्युक्तम् ।

आभ्यां ज्ञायते यत् मनः परमपुरुषे योजितं चेन्मुक्तये अन्यथा बन्धाय भवति ।

एवमत्र सूत्रेण सह सङ्गतिरपि सञ्जायते ।

सूत्रम् :–

१.२६. अनन्यभक्त्या तद्बुद्धिलयादत्यन्तम् ॥३–२–५॥

भावः–

जीवस्य अन्तःकरणमुद्भुतः संसारः कदा निवृत्तिमाप्स्यति? अस्योत्तरं सूत्रेणानेन दीयते ।

भक्तस्य तस्य यदा अनन्यभक्त्या परमेश्वरे शेमुषेः लयः ज्ञायते तदा तस्यात्यन्तकी मुक्तिः भवति ।

भगवद्भक्तिमतामनवरतं सङ्गेन समुत्पन्ना यानन्या एकान्तिकी भक्तिः, तया सर्वज्ञसत्यसंकल्पसमस्तकामपरिपूर्णसर्वेश्वरश्रीपतिश्रीकृष्णे यदा बुद्ध्यन्तः करणलये जाते परमैकान्तिकात्यन्तसुखरूपं कल्याणमुपपद्यते ।

समन्वयः –

श्रीमद्भागवते पञ्चमस्कन्धे श्रीव्यासेन प्रत्यपादि यत् –

"योऽसौ भगवति सर्वभूतात्मन्यनात्म्येऽनिरुक्तेऽनिलयने परमात्मनि

वासुदेवे , अनन्यनिमित्तभक्तियोगलक्षणे, नानागतिनिमित्ताविद्याग्रन्थिरन्ध-नद्वारेण यदा हि महापुरुषप्रसङ्गः"

अस्यायं भावः यदा प्राणिनां परमेश्वरभक्तभूतानां महापुरुषाणां सङ्गः तदा सर्वभूतन्तर्यामीपरमात्मानं प्रति भक्तियोगरूपास्तधारणस्नेहः सञ्जायते । स स्नेह एव अनेकजन्मनिमित्तभूताया अविद्यायाः ग्रन्थीनां विनाशेन मोक्षदः भवति ।

श्रीमत्ससङ्गिजीवने च तृतीयप्रकरणे सप्तमेऽध्याये प्रथमद्वितीयपद्ययोः सतां भगवद्दर्शनलालसा प्रदर्श्यते ।

शाखानगरसंस्थानां मुनीनां सा तु शर्वरी ।

आसीत् कल्पसमाराजन् तद्दिदृक्षातुरात्मनाम् ॥३-७-१॥

अत्र शाखानगर्यागतानां मुनीनां भगवतो चरणारविन्ददर्शनलालसया सा निशा कल्पसमा दीर्घाभाषत ।

एतादृशां सतां यदा सङ्गः भवति । यस्य सत्संगप्रचारं स्वयं श्रीहरिः शुश्रूषते तदा परमानन्दसन्दोहानुरागः भवत्येव इत्यत्र न शंसीतिः ।

इत्थमत्र उभयत्र सूत्रसमन्वयः सर्वथा सर्वरूपेण सङ्गच्छत एव इति दिक् ।

९
अथ नारदभक्तिसूत्रविमर्शः

तत्समन्वयश्च प्रारभ्यते

सूत्राणामेतेषां श्रीमद्भागवतसत्सङ्गिजीवनाभ्यां सह समन्वयः साध्यते ।

सूत्रम् :-

२.१. सा त्वस्मिन् परमप्रेमस्वरूपा ॥ २ ॥

भावः-

आचार्यः नारदः भक्तिं लिलक्षयिषुः द्वितीयेनानेन सूत्रेम तां लक्षयन्नाह सूत्रमिदम् । भक्तिर्नाम पूर्णपुरुषोत्तमे पुरुषे उत्कटस्नेहस्वरूपा ।

समन्वयः :-

श्रीमद्भागवतस्य प्रथमे स्कन्धे प्रथमेऽध्याये ऋषय उचुः यत् –

वयन्तु न वितृप्याम उत्तमश्लोकविक्रमे ।
यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे ॥

१/१/९॥

अत्र मुनीनां प्रतिपदं स्वादुत्वं परमप्रेमरूपमेव तेनैव न तेषां तल्लीलाश्रवणमननयोः न तृप्तिः जायते ।

तत्रैव नारदः व्यासं प्रति ब्रूते षष्ठेऽध्याये –

प्रेमातिभरनिर्भिन्नपुलकाङ्गोऽतिनिर्वृतः ।
आनन्दसम्प्लवे लीनो नापश्यमुभयं मुने ॥

१/६/१७॥

अत्र नारदस्य परमपुरुषे या भक्तिः जाता सा परमप्रेमस्वरूपा एव तेनैव तस्य रोमाञ्चोऽजायत ।

तत्रैव दशमस्कन्धेओकविंशेऽध्याये वेणुगीते –

पूजां दधुः विरचितां प्रणयावलोकैः ॥

१०/२१/११॥

इत्यत्र प्रणयावलोकैः इति परमप्रेम एव संसूच्यते।

द्वाविंशे चाध्याये वस्त्रहरणलीलायां गोपीनां प्रेमदर्शनं यथा –

तस्य तत्क्ष्वेलितं दृष्ट्वा गोप्यः प्रेमपरिप्लुताः ॥

१०/२२/१२॥

अतः गोपीनां सा भक्तिः परमप्रेमस्वरूपैव इति एभिः वचनैः ज्ञायते तेन भक्तिः प्रेमस्वरूपैति सूत्रमिदं सर्वथा सङ्गच्छत एव।

श्रीमत्सत्सङ्गिजीवने वेदप्रकरणे सप्तषष्टितमेऽध्याये अस्य सूत्रस्य भावः प्रादर्शि शतानन्दमुनिना –

वासुदेवावतारेऽथ माहात्म्यज्ञानपूर्विका।
स्नेहेन सेवावृत्तिर्या सा भक्तिरिति कथ्यते ॥

४/६७/१७॥

अत्र श्रीकृष्णाद्यवताराणां माहात्म्यज्ञानपूर्विका या सेवावृत्तिः सा भक्तिः कथ्यते। ये नावतारमाहातम्म्यमवगच्छन्ति ते शास्त्रज्ञा अपि न गोपीवन् नोद्धववद् भक्तिरसमर्मज्ञाः भवन्ति।

अत्र स्नेहेन सेवावृत्तिः इत्यत्र परमप्रेमरूपा इत्यस्य समन्वयः सञ्जायते। अतः सूत्रमिदं पद्येनाने सर्वथा पूर्णरूपेण समन्वयमेति।

सूत्रम् :-

२.२. यल्लब्ध्वा पुत्रान् सिद्धो भवति, अमृतो भवति, तृप्तो भवति ॥४॥

भावः-

पुरुषः यां भक्तिं प्राप्य सर्वथा सिद्धो भवति, सुधाकल्पः जायते च सर्वथा संतृप्तो भवति न किमपि वाञ्छति इत्यर्थः।

समन्वयः :-

श्रीमद्भागवते प्राणभूते दशमस्कन्धे षोडशेऽध्याये सूत्रस्यास्य भावः नागपत्नीभिः प्रत्यपादि यथा –

न नाकपृष्ठं न च सार्वभौमं
न पारमेष्ठ्यं रसाधिपत्यम्।
न योगसिद्धीरपुनर्भवं वा
वाञ्छन्ति यत्पादरजः प्रपन्नाः ॥

१०/१६/३७॥

अत्र कालीयपत्नीभिः भक्तिरसामृतेन संतृप्ताः भक्ताः, सिद्धाः न स्वर्गलोकं कामयन्ते, न वा चक्रवर्तित्वं समीहन्ते न वै परमेश्वरत्वं वाञ्छन्ति, न पृथिव्याधिपत्यं न वै योगस्य अणिमाद्याः सिद्धीः इच्छन्ति । नाम भक्तिमिमां लब्ध्वा भक्तानां सिद्धता, अमृतता जायते इति सिद्धम् ।

तत्रैव च एकोनचत्वारिंशेऽध्याये अक्रूरः परमात्मानं भक्त्या प्राप्य–

भगवद्दर्शनाहलादबाष्पपर्याकुलेक्षणः ।
पुलकाञ्चित औत्कण्ठ्यात् नाऽशकन् नृप ॥

१०/३९/३५॥

इत्यत्राक्रूरः परमात्मनं प्राप्य तादृशः तृप्तः यत्किमपि वक्तुं नाशकत् ।

द्वितीय प्रकरणे श्रीहरिगुणगणौघे श्रीमत्सत्सङ्गिजीवने एकत्रिंशेऽध्याये अभयराजकथानकेन सूत्रार्थोऽयं समनुवर्णितः–

सपुत्रो नृपतिर्नित्यं दिवा निशि च सादरम् ।
प्रीत्यानुवर्तमानस्तं सिषेवे समुनिं हरिम् ॥

२/३१/१३॥

अत्र अभयराजभूपः परमात्मनं श्रीहरिं लब्ध्वा सिद्धो जातः तेन सः अहर्निशं ससुतः परमप्रेमपूर्वकं मुनिगणमण्डितं तं शिषेवे ।

अध्यायान्ते च भगवत्प्राप्त्या भक्तिप्राप्त्या अमृतो तृप्तो च बभूव तेन न भगवन्तं जिहासति ।

इत्थमत्र सूत्रसमन्वयमाप्नोति ।

सूत्रम् :–

२.३. यज्ज्ञात्वा मत्तो भवति, स्तब्धो भवति, आत्मरामो भवति ॥६॥

भावः–

भक्तः, भक्तिं तया च परमात्मानं जानीते ततः उन्मत्तः, स्थितः, आत्मन्येव च रममाणः दृश्यते ।

समन्वयः :–

श्रीमद्भागवते प्रथमे स्कन्धे मुनिसङ्ख्याके अध्याये सूतः वक्ति यत् –

आत्मारामाश्च मुनयो निग्रन्था अप्युरुक्रमे ।
कुर्वन्त्यलौकिकीं भक्तिमित्थंभूतगुणो हरिः ॥

१/७/१०॥

अत्र शुकदेवः निवृत्तिनिरतोऽपि मुनिः कथं सात्वतसंहितामिमां समभ्यसत्

इति प्रश्नोत्तरे सूतमुनेरुत्तरमिदं यत् भक्तितत्त्वमेव तादृशं येन आत्मरममाणाः योगिनोऽपि आकृष्टाः भूत्वा परां भक्तिं चिकीर्षन्ति ।

श्रीमद्भागवते च पञ्चमस्कन्धे षष्ठाध्याये ऋषभदेवचरिते व्यासेनावर्णि यत् –

तस्य ह वा एवं मुक्तलिङ्गस्य भगवत ऋषभस्य योगमायावासनया देह इमां जगतीमभिमानाभासेन संक्रममाणः कोङ्कवेङ्ककुटकादक्षिणकर्णादकान् देशान् यदृच्छयोपागतः कुटकाचलोपवन आस्यकृताश्मं कलव उन्माद इव मुक्तमूर्धजोऽसंवीत एव विचचार ॥ ५/६/७॥

अत्र ऋषभदेवस्य मुक्तलिङ्गस्य परमभागवतस्थित्या भक्त्या च उन्मत्ता स्थितिः दृश्यते तेन सूत्रमिदं अत्र सङ्गच्छत एव इति ।

तत्रैव भागवते दशमे स्कन्धे सूत्रार्थोऽयं वर्णितः व्यासेन –

गोप्यस्तद्गीतमाकर्ण्य मूर्छिता नाऽविदन् नृप ।
स्त्रंसद्दुकूलमात्मानं स्त्रस्तकेशस्त्रजं ततः ॥

१०/३४/२४॥

अत्र गोप्यः तस्य भगवतो भक्तिगीतं श्रुत्वा मत्ताः स्तब्धाश्च बभूवुः तेनैव स्ववस्त्रभानं केशमानं च तत्यजुरिति सूत्रार्थः सङ्गच्छतेऽत्र ।

श्रीशतानन्दमुनिगुम्फिते श्रीमत्सत्सङ्गिजीवने द्वितीये प्रकरणे एकपञ्चाशत्तमेऽध्याये सूत्रस्यास्य भावः समनुवर्णितः दृश्यते –

भगवान् श्रीहरिः सूर्यपुरस्थितः भक्तराजभालचन्द्रस्योत्तरं विदधानः आह–

स्वतनयधनधामलोकलज्जाः सुरवरधामगमैषणां च हित्वा ।
भगवति हि दृढानुरागमाप्तो निजहृदि यस्तमसौ स्मरत्यखण्डम् ॥

इत्यत्र भगवतः भक्त्या भावितस्य भक्तस्य कर्तव्यानि शतनन्दमुनिना अवर्णिषतमत्तः, स्तब्धः, आत्माराम एव भक्तः स्वस्य तनयान्, धनानि, भुवनानि, समाजं लज्जां च अपि च स्वर्गलोकगमनेच्छां त्यक्त्वा दृढभिक्तभावभरितः श्रीहरिमखण्डं स्मरति ।

एवमत्रसूत्रार्थः सर्वथा समन्वयमेति ।

सूत्रम् :-

५.२.४. तस्मिन्नन्यता तद्विरोधिषूदासीनता च ॥८॥

भावः-

भक्तिसम्प्रदायप्रवर्तकाचार्याः तस्मिन् परमात्मन्येव अनन्याश्रयः तस्य द्वेषिषु औदासीन्यं च भक्तानां जायत इति सूत्रेणानेन समर्थयामास ।

समन्वयः :-

श्रीमद्भागवते मनुमैत्रययोः संवादे तृतीयस्कन्धे सूत्रार्थोऽयं वर्णितः यथा –

तस्मिन् प्रसन्ने सकलाऽऽशिषां प्रभौ
किंदुर्लभं ताभिरलं लवात्मभिः ।
अनन्यदृष्ट्या भजतां गुहाशयः
स्वयं विधत्ते स्वगतिं परः पराम् ॥

३/१३/५०॥

अत्रायं भावः अनन्यदृष्ट्या ये परमात्मानं श्रीहरिं भजन्ति परमया भक्त्या तेभ्यः न किमपि दुर्लभं एवं स्वयं नारायणः परामुत्तयां मोक्षपदवीं ददाति।

अनन्याश्रयस्य फलमिदं यत् स्वयं स एव परां गतिं दातुं समीहते।

गोपीनाञ्च सर्वत्र परमात्मानं विना औदासीन्यं दृश्यत एव इति सूत्रसङ्गतिः स्पष्टैव।

श्रीमद्सत्सङ्गिजीवने तुरीय प्रकरणे चतुश्चत्वारिंशेऽध्याये त्रिदशोत्तरशते पद्ये–

तस्यैव सर्वथा भक्तिः कर्तव्या मनुजैः भुवि ।
निःश्रेयस्करं किञ्चिन्ततोऽन्यन्नेति दृश्यताम् ॥

४/४४/११३॥

अत्र तस्यैव इति पदे एवकारः देवान्तरभक्तिं निरुद्ध्य कृष्णस्यैव अनन्याश्रय उपदिष्टः। मानवानामितोऽधिकं न किमपि शास्त्रान्तरेषु प्रतिपादितं साधनमतः "अन्यन्न" इत्युक्तं वर्तते। तेन तस्मिन्नेवानन्यता धार्या भक्तैः इति सूत्रार्थः सङ्गच्छते अत्र।

सूत्रम् :-

२.५.नारदस्तु तदर्पिताखिलाचारता तद्विस्मरणे परमव्याकुलतेति ॥९॥

भावः-

महर्षिः भक्त्याचार्यः "पूजादिष्वति" अन्येषामप्याचार्याणां भक्तेः लक्षणानि त्रीणि प्रतिपाद्य चतुर्थेन लक्षणेन स्वाभिमतं लक्षणं चिकीर्षुराह सूत्रमिदम्।

तस्मिन् परमपुरुषभूते परमेश्वरे एव समेषामप्याचाराणां समर्पणं तस्य लीलापुरुषस्य भगवतः विस्मरणे वियोगे वा परमाकुलता भवति परमभागवतानामिति सूत्रार्थः।

समन्वयः :-

सात्वतसंहिताभूते वेदवृक्षपक्वफले श्रीमद्भागवते हृदयभूतदशमस्कन्धे श्रीशुकेनावोचि

यत् –

अन्तर्हिते भगवति सहसैव व्रजाङ्गनाः ।
अतप्यंस्तमत्वक्षाणाः करिण्य इव यूथपम् ॥

१०/३०/१॥

अत्र व्रजाङ्गनानां भगवतः वियोगे तापतप्तिः तथा तत्रैव द्वितीये पद्ये–

तास्ताः विचेष्टाः जगृहुस्तदात्मिकाः ॥ १०/२३०/२॥

इत्यत्र तदात्मिकाः व्रजाङ्गनाः इति पदेन तदर्पिताखिलाचाराः ताः इति सूत्रार्थः सर्वथा सङ्गच्छते एव।

द्वात्रिंशे चाध्याये परमव्याकुलता व्रजवल्लभीनां गोपीनां दृश्यते यथा –

इति गोप्यः प्रगायन्त्यः प्रलपन्त्यश्च चित्रधा ।
रुरुदुः सुस्वरं राजन् कृष्णदर्शनलालसाः ॥

१०/३२/१॥

अत्र श्रीशुकदेव महाराजः राजानं परीक्षितं प्रति गोपीनां तद्विरहव्याकुलतां व्यनक्ति।

अत्र कृष्णस्य विरहे तद्दर्शनविरहोऽक्तस्वाभाविकः अतः परमव्याकुलीभूताः एताः व्रजाङ्गनाःकृष्णसमर्पितसर्वस्वाः रोदनमपि सस्वरं चक्रु ः।

अन्यदपि सूत्रार्थवर्णनपरं पद्यं तत्र एकोनचत्वारिंशेऽध्याये दृग्गोचरीभवति, यथा–

गोप्यस्तास्तदुपश्रुत्य बभूवुर्व्यथिता भृशम् ॥

१०/३९/१३॥

अत्र श्रीकृष्णस्य नटनाट्यरूपधरस्य मधुपुरीं गन्तुमुद्यतं श्रुत्वा तद्विरहोत्पत्तौ अत्यन्तं गोप्यः व्यथिताः अभवन्निति स्पष्टमालोक्यते।

श्रीसहजानन्दैश्वर्यगुम्फिते श्रीमत्सत्सङ्गिजीवने द्वीतीयप्रकरणे तृतीयाध्याये राज्ञः उत्तमस्य तदर्पिताखिलाचारता सविस्तरं प्रत्यपादि शतानन्दमुनिना। सः स्वपितरि धामानुगते, पूर्वं तेन पित्रा कृताः कारिताः वा कृष्णमहोत्सवाः तान्तथैव कर्तुमीहते उत्तमराजः।

हरिः स्वाम्यत्र कृपया स्थइतोऽस्त्यस्मासु पत्तने ।
तस्यैव च प्रसादान्नः सम्पदेषाऽस्ति लम्भिता ॥

१३/३/४॥

अतस्तदर्थमेवैषा व्यंयंनेया न चान्यथा ।
पित्रापिनः कृतं हीत्थं तथाऽहं कर्तुमुत्सहे ॥

३/३/५॥

इत्युभयोः पद्ययोः श्रीहरिकृपालब्धाः सम्पदः श्रीकृष्णमहोत्सवेभ्य एव प्रयुक्ताः भवन्तु इति धिया, पितुः मार्गमनुसरन् सः भगवत्येव अखिलां सम्पत्तिं वितर्तुमिच्छति । एवमत्र सङ्गतिः जायते ।

सूत्रम् :-

२.६.फलरूपत्वात् ॥२६॥

भावः-

इयं हि भक्तिः ज्ञानवैराग्यकर्मभ्योऽप्यधिका वर्तते फलरूपत्वादिदि मुनेराशयः सूत्रेऽस्मिन् उपवर्णितः ।

ज्ञानादिमार्गेषु फलन्तु जायत एव परं तत्र मार्गे पतनभयाधिक्यात् अत्र तु साक्षात् फलोपपत्तिः ।

समन्वयः :-

श्रीमद्भागवते शिवनेत्राख्ये स्कन्धे कपिलमुनिना अमानि यत् –

वासुदेवे भगवति भक्तियोगः प्रयोजितः ।
जनयत्याशु वैराग्यं ज्ञानं यद्ब्रह्मदर्शनम् ॥

३/३२/२३॥

अत्र कपिलमुनिः तस्य गुणाश्रयया भक्त्या भजनीयपदाम्बुजं भगवन्तं परमात्मानं भज । तेनैव भक्तियोगेन योगिनामपि दुर्लभं ज्ञानविरागयुतं भगवतो दर्शनं नूनं ते भविष्यति ।

अत्र भक्त्यैव भगवत्प्राप्तिरूपं फलं त्वया लप्स्यते, अयमेव सरलः उत्तमश्च पन्थाः नान्य इति ।

श्रीनारायणमहिमोदधिभरिते सत्सङ्गिजीवने तृतीयप्रकरणे षोडशेऽध्याये भावोऽयं शतानन्दमुनिवरेणालेखि यथा –

स्थितं दीनानाथभट्ट विप्रं तत्रावलोक्य सः ।
तस्मै प्रसन्नो वासांसि स्वकीयानि ददौ तदा ॥

३/१६/२५॥

इत्यत्र भगवतो भक्तेः फलरूपमेव योगिजनदुष्प्रासं तस्यैव प्रसादीभूतं वस्त्राभरणादिकं तस्मै ददौ इति भक्तेः फलमेव मन्तव्यं नान्यदिति ।

इत्थमत्र सूत्रार्थः सर्वथा सर्वरूपेण समन्वयं संसाधयति।

सूत्रम् :-

२.७. इश्वरस्यापि अभिमानद्वेषित्वाद् दैन्यप्रियत्वाच्च ॥२७॥

भावः-

भगवतो नवविधभक्तिषु एका दैन्यभक्तिः वर्तते सा च भगवतेऽत्यन्तं रोचते।

भगवतो अभिमानं तु कदापि न रुचये जायते तेनैव अभिमानिनः दुर्योधनस्य विविधानि पक्वान्नानि परित्यज्य विदुरस्य दैन्यप्रियस्य गृहं व्रजित्वा तेनास्वादि प्रेम्णा तस्य भोजनम्।

समन्वयः :-

श्रीमद्भागवते षष्ठे स्कन्धे —

वृत्रस्य स्तुतावपि सूत्रार्थोऽयं दृग्गोचरी भवति यथा –

अहं हरे तव पादकैमूल
दासानुदासो भवितास्मि भूयः।
मनः स्मरतासुपतेः गुणानां
गृणीत वाक् कर्म करोतु कायः ॥

६/११/२४॥

अत्र वृत्रस्य दैन्यभावः प्रकटित एव दृश्यते तेनैव सः दासानुदासः बुभूषुः भगवद्गुणकीर्तनस्मरणायैव मनः प्रेरयामास च संयोजयामास।

भगवतो न केनचित् सख्यं न द्वेष्यं परं गुणत्वादेव तत्सञ्जायते यथा कंसदुर्योधनशिशुपालादीनाम् अभिमानमेव भगवतः द्वेषि तेनैव तेषां द्वेषः इति।

श्रीनारायणयशोगुम्फनपरायणे श्रीसत्सङ्गिजीवने दैन्यप्रियत्वं तृतीयप्रकरणस्य एविंशतितमे अध्याये श्रीभक्तोत्तमशतानन्दमुनिः जग्रन्थ-

एवमानन्दयन् भक्त्या पार्षदान्स्वान्स ईश्वरः।
सर्वानपि मुहुः प्रीत्या यथेष्टं पर्यवेशयत् ॥

३/२१/२५॥

इत्यत्र भक्ताः, पार्षदाः, सन्तः राजान्यः सर्वेऽपि भगवन्तं प्रति दीनभावमादधानाः सन्ति तेनैव निखिलस्थावरजङ्गमस्त्रष्टापूर्ण पुरुषोत्तमः श्रीनारायणः स्वयं तान् सर्वान् भक्त्या वशीभूतः पर्यवेषयत्।

अत्र भगवतो दैन्यप्रियत्वं स्पष्टमेवालोक्यते।

सूत्रम् :-

२.८. तस्मात्सैव ग्राह्या मुमुक्षुभिः ॥३३॥

भावः-

सर्वेऽभ्योप्यधिकतरत्वात् एषा भक्तिरेव मोक्तुतुमिच्छुकैः ग्रहणीया नान्यत्किमपि।

दुर्वासाः दुःखमापन्नो पुरा भक्तिविनिन्दकः।

इत्यादिभिः पद्यैश्चान्यैश्च कथानकैः ज्ञायते यत् न तत्र भक्तिरिव सुलभो मोक्षः।

समन्वयः :-

श्रीमद्भागवते हरनेत्राख्ये स्कन्धे भक्तिं विना न कुत्रापि सुखमिति नवमाध्याये ब्रह्मणा स्वमुखेनावादि-

तावद्भयं द्रविणदेहसुहृन्निमित्तं
शोकः स्पृहा परिभवो विपुलश्च लोभः।
तावन्ममेत्यसदवग्रह आर्तिमूलं
यावन्न तेऽङ्घ्रिमभयं प्रवृणीत लोकः॥

३/६/९॥

अत्र मुमुक्षुभिः इयमेव कथं ग्रहणीया इति प्रश्नस्य सम्यगुत्तरमवाप्यते। धनचिन्ता, देहचिन्ता, मित्रचिन्ता, भयम्, शोकः, इच्छा, पराजयः, विपुलः लोभः, ममत्वम्, दुराग्रहादिकं एतत् सर्वं तावदेव बाधकं यावन्नते अभयन्नाम मोक्षदं चरणकमलाश्रयं जनः न वृणुते।

अतः एव मुमुक्षिभिः एषा भक्तिरेव ग्राह्या, यया सर्वमोहनिराशपूर्वकं भगवद्धाम प्राप्यते।

अपि च श्रीमद्भागवते प्राणाख्ये स्कन्धे सूत्रार्थं दृढयन्तः भद्रश्रवस उचुः यत् —

यस्यास्ति भक्तिः भगवत्यकिञ्चना
सर्वैर्गुणैस्तत्र समासते सुराः।
हरावभक्तस्य कुतो महद्गुणाः
मनोरथेनासति धावतो बहिः॥

५/१८/१२॥

अत्र भक्तेरेव ग्राह्यत्वे सयुक्तियुक्तं प्रामाण्यमवाच्यते यस्य भक्तस्य भगवति पूर्णपुरुषोत्तमे नारायणे श्रीहरौ अकामा परा भक्तिः जायते तत्र सुराः सर्वैः गुणैः समवेताः तिष्ठन्ति नाम तत्र सर्वगुणानां सर्वामराणाञ्च नित्यनिवासः अवश्यं भवति।

यत्र एषा भक्तिः नास्ति तत्र न महद्गुणाः अपि भवन्ति।

श्रीहरिलीलापूर्णे सत्सङ्गीजीवने तुरीयप्रकरणे चतुश्चत्वारिंशेऽध्याये एकविंशत्यधिकैकशते पद्ये सूत्रस्यास्य भावोऽग्राहि मुनिना शतानन्देन यथा–

तत्र ब्रह्मात्मना कृष्णसेवा मुक्तिश्च गम्यताम् ॥४/४४/१२१॥

मोक्तुमिच्छद्भिः संसारात् मुक्तिरिष्यते का सा मुक्तिः? इत्यत्र समादधाति –

"**कृष्णसेवा मुक्तिः**"

परमपुरुषश्रीकृष्णस्य परमप्रीत्या कृता सेवा एव मक्तिपदवाच्या। अतोऽत्र सूत्रमिदं सर्वथा समन्वेति।

सूत्रम् :-

२.९.अव्यावृतभजनात् ॥३६॥

भावः-

भगवतो प्राप्तिसाधनेषु अनेकेषु सत्स्वपि तत्र भजनं सर्वाण्यपि साधनान्यतिशेते इति नाविदितं तत्र भवतां भक्तिशिरोमणीनाम्। भजनं भक्तिः सेवा वा इत्यर्थः।

"**सेवाधर्मः परमगहनः योगिनामप्यगम्यः**"

इति सूक्तिरपि सार्थ भवति।

समन्वयः :-

श्रीमद्भागवते पिनाकपाणिलोचनाख्ये स्कन्धे श्रीशुकेन राजानं प्रति म्रियमाणानां मानवानां अन्तिमाः धर्माः प्रोक्तास्तत्र–

एतावानेव यजतामिह निःश्रेयसोदयः।
भगवत्यचलो भावो यद्भागवतसङ्गमः॥

२३/३/११॥

अत्र पूर्वस्मिन् पद्ये सकामः निष्कामः वा भक्तः मोक्षकामः तीव्रेण भक्तियोगेन परमं पुरुषं भजेत इत्युक्त्वा तद्भजनं कीदृशम्?

इत्यत्र अपरं पद्यमिदं समायोजयति भजनमेव केवलं निःश्रेयसाय तच्च अचलं स्थिरम् अखण्डं कल्पत इति।

श्रीमत्सत्सङ्गिजीवने चतुर्थप्रकरणे चतुश्चत्वरिंशेऽध्याये श्रीशतानन्दमुनिना जगदे–

गुणिनां गुणवत्ताया ज्ञेयं ह्येतत् परं फलम्।
कृष्णे भक्तिश्च सत्सङ्गः .... ॥

४/४४/११४॥

अत्र विद्यावतामपि या गुणवत्ता, तस्याः श्रेष्ठतमं पचेलिमं फलं कृष्णभक्तिस्तथा

सत्सङ्गः एव वर्तते नाम अखण्डभक्तिं विना गुणिनोऽपि कदाचित् पतन्ति, तस्मात् अव्यावृतभजनमेव वरमिति सूत्रार्थोऽयं सर्वथा सर्वरूपेण सङ्गच्छते।

सूत्रम् :-

२.१०. लोकेऽपि भगवद्गुणश्रवणकीर्तनात् ॥३७॥

भावः

भक्त्येकलक्षभूताचार्यः श्रीनारदः अखण्डजनमाहात्म्यं प्रकाश्य गुणानां श्रवणकीर्तनयोः माहात्म्यं प्रकाश्य संसारेऽपि प्राधान्यमुररीकृत्य भगवतो गुणानां श्रवणकीर्तनयोः माहात्म्यं सूत्रेणानेन वर्णयामास।

समन्वयः :-

पुराणोत्तमे श्रीमद्भागवते द्वितीये च तृतीये स्कन्धे चतुर्थसप्तमयोरध्याययोः सूत्रार्थोऽयं श्रीव्यासेन प्रत्यपादि यथा–

यत्कीर्तनं यत्स्मरणं यदीक्षणं यद्वन्दनं यच्छ्रवणं यदर्हणम्।
लोकस्य सद्यो विधुनोति कल्मषं तस्मै सुभद्रश्रवसे नमो नमः॥

२/४/१५॥

अत्र श्रीशुकमुनिः भगवतो गुणानां कीर्तनं, स्मरणम्, दर्शनम्, श्रवणम्, पूजनम् इत्येतत् सर्वं शीघ्रमेव पापनाशकमिति प्रतिपादयति।

अपि च तृतीये आह मैत्रेयः –

अशेषसंक्लेशशमं विधत्ते गुणानुवादश्रवणं मुरारेः।
कुतः पुनस्तच्चरणारविन्द परागसेवारतिरात्मलब्धा॥

३/७/१३॥

अत्र मैत्रेयः विदुरं प्रत्युवाद यत् मुरारेः भगवतः श्रीकृष्णस्य गुणानुवादः वा तस्य श्रवणं, तदुभयं समस्तकष्टशमकं वर्तते तत्र यदि तस्य नाराणस्य पावनाङ्घ्रिसेवनं स्यात्तदा तु आत्मप्राप्तिः नूनमिति।

श्रीमत्सत्सङ्गिजीवनाख्ये सहजानन्दस्वामिगुणमहिमापरे सर्वशास्त्रसारभूते चतुर्थे प्रकरणे चतुश्चत्वारिंशे भगवद्गुणश्रवणमाहात्म्यं प्रादर्शि यथा –

श्रव्यः श्रीमद्भागवतदशमस्कन्धआदरात्।
प्रत्यहं वा सकृद्वर्षे वर्षे वाच्योऽथ पण्डितैः॥

४/४४/१७७॥

अत्र भगवतः श्रीकृष्णस्य गुणमहिम्ना दशमस्य श्रेष्ठत्वं निगद्य तस्य श्रवणं भक्तौ परमोपकारकमिति उपदिदेश शतानन्दमुनिः।

अतः लोके श्रवणमहात्म्यमेतेन सर्वथा सिद्धमेव। एवमेव सूत्रमिदं समन्वेति।

सूत्रे –

२.११. महत्सङ्गस्तु दुर्लभोऽमोघश्च ॥३९॥

२.१२. लभ्यतेऽपि तत्कृपयैव ॥४०॥

भावः–

नारदर्षिः अस्याः भक्तेः प्राप्त्युपायं विवदिषुराह सूत्रद्वयमिदम्।

भावस्तु महतां भागवतानां सङ्गः न यथाकथञ्चिद् लभ्यः स तु महत्पुण्यैः एव लभ्यते, स च लब्धो सङ्गः न कदापि विफलो भवति परमात्मनं साधयत्येव।

द्वितीयेन सूत्रेण सः कथं प्राप्यते इत्यत्र तस्य परमात्मनः अनुकम्पा एव तत्र कारणं जायते नान्यत् किमपीति।

समन्वयः :–

श्रीमद्भागवते तृतीयचतुर्थस्कन्धयोः सूत्रार्थोऽयं समर्थितः श्रीव्यासमहर्षिणा यथा–

जनस्य कृष्णाद्विमुखस्य दैवाद् अधर्मशीलस्य सुदुःखितस्य।
अनुग्रहायेह चरन्ति नूनं भूतानि भव्यानि जनार्दनस्य ॥

३/५/३॥

अत्र महत्सङ्गस्य दुर्लभता कथं वर्तत इति प्रश्नो विचारितः सविवरणं यथा ये कृष्णाद् विमुखाः अधर्मशीलाः दुःखिताः संसारदावाग्निदग्धाः तेषां अनुकम्पार्थमेव लोकेऽस्मिन् जनार्दनस्य भव्याः दिव्याः साधवः विचरन्ति।

अपि च

तृतीये पञ्चविंशेऽध्याये भगवान् स्वयं स्वमुखेन महत्सत्सङ्गस्यामोधत्वं संसूचयन्नाह–

प्रसङ्गमजरं पाशनात्मनः कवयो विदुः।
स एव साधुषु कृतो मोक्षद्वारमपावृत्तम् ॥

३/२५/२०॥

अत्र संसारे कृतः सङ्गः पाशरूपः स एव यदि सत्सु विधीयेत तदा मोक्षप्राप्तिः सुलभैव इति।

तत्रैव श्रीनारायणः साधुसङ्गमाहात्म्यं प्राह–

त एते साधवः साध्वि सर्वसङ्गविवर्जिताः।
सङ्गस्तेष्वथ ते प्रार्थ्यः सङ्गदोषहरा हि ते ॥

३/२५/२४॥

एते मामकं सङ्गं विहायान्यत्र सर्वत्र त्यक्तसङ्गाः अतः तेष्वेव सङ्गः स्यादिति सर्वदा प्रार्थनीयं तेन अस्माकं सर्वदोषानपि सत्श्रावणेन नाशयन्तीति नूनं वर्तते। तत्रेव पञ्चविंशे पद्ये–

सतां प्रसङ्गान्मम वीर्यसंविदो भवन्ति हृत्कर्णरसायनाः कथाः ।
तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धा रतिर्भक्तिरनुक्रमिष्यति ॥

३/२५/२५॥

अत्र भगवान् स्वयं स्वमुखकमलेन एतेषां साधूनां सङ्गेन प्रसङ्गेन मदीयाः कथाः कर्णानां ओषधीरूपाः हृदयस्य आनन्ददायिन्यः भवन्ति च तेषां सेवया शीघ्रमेव मोक्षगतिः भक्त्या प्रेम्णा प्राप्यत एवेति।

भक्तोत्तमो ध्रुवोऽपि स्वस्तुत्या अस्यैव सूत्रस्य भावं दृढयामास–

भक्तिः मुहु प्रवहतां त्वयि मे प्रसङ्गो भूयादनन्त महताममलाशयानाम् ।
येनाञ्जसोल्बणमुरुव्यसनं भवाब्धिनेष्ये भवद्गुणकथामृतपानमत्तः ॥

४/९/११॥

अत् ध्रुवः मे सङ्गः कुत्र भवेदिति जिज्ञासायां —

"महताम् अमलाशयानाम् प्रसङ्गः मे भूयात्"

इत्यनेन भगवत्कृपातो साधूनामेव विशुद्धानां भक्तिमतां मम सङ्गः भवेदति भगवन्तं प्रार्थयते।

श्रीहरिनारायणलीलाग्रथिते सत्सङ्गिजीवने ग्रन्थे अपरप्रकरणे मुनिसङ्गख्याके अध्याये भगवान्नारायणः मुनीनां प्रश्नोत्तरे सूत्रार्थमिममर्णयत् —

गेयं यशः सदाविष्णोः तदीयानां च भक्तितः ।
सङ्गः सतां सदाकार्यो................ ॥

२/७/२०॥

इत्यत्र सङ्गः हरिसंसाधकत्वात् सतां साधूनामेव कर्तव्यः तेनैव लाभः भगवतो प्राप्तिः शक्येति।

प्रथमे च प्रकरणे द्वात्रिंशेऽध्याये पञ्चसप्ततिः ७५ साधूनां लक्षणानि प्रतिपाद्य–

एतेषामेव सङ्गेन साङ्गाभक्तिर्मुमुक्षुभिः ।
कृष्णस्य प्राप्यते नूनं माहात्म्यज्ञानपूर्विका ॥

१/३२/३७॥

इत्यनेन पद्येन सतां सङ्गः कथं दुर्लभः कथञ्चामोघः तर्हि तेन कृष्णस्य माहात्म्यज्ञानपूर्विका परा भक्तिः प्राप्यते इत्युक्तम् इत्थमत्र उभयत्र सूत्रं समन्वेति।

सूत्रम् :-

२.१३. तदेव साध्यतां तदेव साध्यताम् ॥४२॥

भाव:-

भगवत: तद्भक्तानाञ्चाभेदात् तदेवोभयं साधनीयं तदेवोभयं साधनीयमिति। द्विरुक्तिश्चात्र दाढर्यार्थं ज्ञेयार्थस्य।

यतो हि भागवता: एव भगवद्प्रापका:, त एव तस्य दर्शका: सोपानभूता:, अत: तेषु साधितेषु भगवानवश्यं साध्यत एव।

प्रह्लादध्रुवयो: नारदसङ्गात् भगवतो प्राप्तिरभवत् इत्यत्रोदाहरणं ज्ञेयम्।

समन्वय: :-

इममेव भावं स्फोरयन्व्यासमहर्षि: तृतीये स्कन्धे पञ्चविंशेऽध्याये आह —

अनिमित्ता भागवती भक्ति: सिद्धेर्गरीयसी।
जरयत्याशु या कोशं निगीर्णमनलो यथा ॥

३/२५/३३॥

अत्रायं भाव: भागवतां सङ्गेन लब्धा या भक्ति: सैव निष्कामा सिद्धेरपि महत्वं समादधाति चास्माकं कामवासनादिकक्कोशं समूलन्नाशयति यथाग्नि: तत्पतितम्। एवमेव तत्र प्रोक्तम् —

न कर्हिचिन्मत्परा:, शाातरूपे नङ्क्ष्यन्ति नो मेऽनिमिषो लेढि हेति:।
येषामहं प्रिय आत्मा सुतश्च सखा गुरु: सुहृदो दैवमिष्टम् ॥

३/२५/३९॥

अत्र भगवता प्रोक्तञ्च —

ये भक्ता: मां प्रियं, आत्मानम्, मित्रम्, पुत्रम्, गुरुम्, भाग्यं वा मन्वते ते न कदापि नष्टा: भविष्यन्ति अपि तु अपुनरावर्तिनं मे लोकमेवाप्नुवन्ति।

सूत्रम् :-

२.१४. दु:सङ्ग: सर्वथैव त्याज्य: ॥४३॥

भाव:-

नारदमुनिराहात्र यद्भक्तौ सर्वबाधकत्वेन कामक्रोधादिजनकत्वेन परमात्मप्राप्तौ बाधकत्वात् दुष्टानां सङ्ग: सर्वप्रकारेण सन्त्यक्तव्य एव।

पूर्वसूत्रेषु कर्तव्यत्वेन महत्सङ्गोऽमोघ: उपदिष्ट: साम्प्रतं सङ्गादेव चित्तव्यापारपरिवर्तनात् तत्रापि दुष्टानां सङ्गेन दुर्गुणाधानात् तस्य त्याग: यथाकथञ्चिद् करणीय एवेति सूत्रेऽस्मिन् मुनेराशय: प्रतिभाति मे।

समन्वयः :-

श्रीमद्भागवते एकादशस्कन्धे सूत्रार्थोऽयं चतुर्थेऽध्याये समन्वयमाप्नोति यथा -

विकर्मणा ह्यधर्मेण मृत्योर्मृत्युमुपैति सः ॥

११/३/४५॥

दुष्टाः वेदविरुद्धमेवाचरन्ति तस्मादाविर्होत्र उवाच तेऽजितेन्द्रियाः विकर्मणा दुष्टकर्मणा अधर्माचरणेन च महाकालमवाप्नुवन्ति अतः तत्सङ्गिनामपि इयमेव स्यात् स्थितिः तदर्थमेव दुष्टसङ्गत्यागायोक्तं सूत्रेऽस्मिन्।

दुष्टसङ्गेन भगवतो भक्तिर्न जायते भगवतो तिरस्कारः भवति तस्य किं फलमिति एकादशे स्कन्धे पञ्चाध्याये चमसेनाकथि-

य एषां पुरुषं साक्षात्मप्रभवमीश्वरम्।
न भजन्त्यवजानन्ति स्थानाद्भ्रष्टाः पतन्त्यधः ॥

११/५/३॥

अत्र दुष्टसङ्गेन भगवद्द्रोहे जाते का गतिः? इति समादधाति - ये दुष्टाः आत्मजन्मदं परमं पुरुषं न भजन्ति परं तमवमानयन्ति ते स्वयोनितः पतिताः भवन्त्यधः इति।

एकादशे च स्कन्धे षड्विंशेऽध्याये भगवता स्वयं दुष्टसङ्गस्य त्याग उक्तः -

सङ्गं न कुर्यादसतां शिश्नोदरतृपां क्वचित्।
तस्यानुगस्तमस्यन्धे पतत्यन्धानुगान्धवत् ॥

११/२६/३॥

अत्र भगवता दुष्टसङ्गस्य त्याज्यता प्रादर्शि च तेन नरकप्राप्तिः प्रादर्शि। श्रीनारायणगुणगणभरिते सत्सङ्गिजीवने तुरीये प्रकरणे चतुश्चत्वारिंशे वारद्वयं दुःसङ्गः न्येषेधिभगवता - अत्र दुःसङ्गः कतिविधः तर्हि अष्टविधः सः सर्वोऽपि त्याज्य एव -

कृतघ्न-सङ्गस्त्यक्तव्यः.................. ॥

४/४४/२६॥

चोरपापिव्यसनिनां सङ्गः पाखण्डिनां तथा।
कामिनाञ्च न कर्तव्यो जनवञ्चनकर्मणाम् ॥

४/४४/२७॥

तथा च

भक्तिं वा ज्ञानमालम्ब्य स्त्रीद्रव्यरसलोलुभाः ।
पापे प्रवर्तमानाः स्युः कार्यस्तेषां न सङ्गमः ॥

४/४४/२८॥

इत्यत्र त्रिभिः पद्यैः अष्टविधः कृतघ्नाद्यः पापप्रवर्तनान्तः सङ्गः भक्तौ बाधकः तस्मात् सः त्याज्य एवेति भगवता समुदघोषि ।

अत्र विशेषरूपेण पातकसंसर्गात् संरक्षणायसङ्गो न गर्भापातिन्याः ॥

१/४४/७०॥

इत्यत्र हिंसाकारणात् तस्या अपि सङ्गः वर्ज्य इति आदिदेश हरिः ।

इत्थमत्र सूत्रमिदं समन्वयं लभते ।

सूत्रम् :-

५.२.१५. कामक्रोधमोहस्मृतिशबुद्धिनाशसर्वनाशकारणत्वात् ॥४४॥

भावः-

कामक्रोधमोहानां त्रिगणः स्मृतेः नाशकः, शेमुषेर्विघातकः उभयोश्च तयोः नाशे सर्वनाशः भवति यथा भगवता गीतायामुक्तं —

क्रोधाद्भवति सम्मोहः इत्यारभ्य बुद्धिनाशात् प्रणश्यतीति अत्र कामक्रोधमोहरूपसोपाने पदनिधानेन फलं सर्वनाश इति भगवता द्योतितम् ।

समन्वयः :-

पुराणजीवातुभूते श्रीमद्भागवते व्यासेन षष्ठे स्कन्धेऽभाणि यममुखेन यत् —

जिह्वा न वक्ति भगवद्गुणनामधेयं चेतश्च न स्मरति तच्चरणारविन्दम् ।
कृष्णाय नो नमति यच्छिर एकदापि तानानयध्यमसतोऽकृतविष्णुकृत्यान् ॥

॥ ६/३/२९॥

अत्राजामिलप्रसङ्गे पद्यमिदं यमेनावोचि के यमलोकमानेयाः? इत्यत्र यस्य रसना भगवन्नामोच्चारणं न वदति, चेतश्च च पादपद्मस्मरणे रतमस्य, यस्य च मस्तकं श्रीकृष्णं न नमति तं विष्णुभक्तिविहरितमेवमत्रानयेत् । नाम भगवद्विमुखाः कामक्रोधामोहग्रस्ताः त एव नरकगामिन नान्ये इति ।

श्रीवासुदेवगुणमहिममण्डिते वेदाद्यमृतभूते सत्संङ्गिजीवने ग्रन्थे तुरीये प्रकरणे चतुश्चत्वारिंशेऽध्याये सर्वनाशहेतुभूतस्य कामस्य निवृत्यर्थमेव –

न स्प्रष्टव्याश्च ताः क्वापि भाषणीयाश्च ता नहि ॥

४/४४/१२४॥

इत्यत्र सङ्गात् सञ्जायते कामः इति नयेन स्त्रीणां स्पर्शरूपसङ्गेन स्वपतनं न

स्यादेतदर्थमेव स्पर्शभाषणनिषेधोऽकारि।

क्रोधात्हिंसा जायत्ते तन्निवारणाय च –

न कर्तव्यमहिंसैव ॥

४/४४/१२॥

इत्यत्र हिंसानिवृत्तिरूपदिष्टा। इत्थमत्र सूत्रस्यास्य समन्वयः साध्यते।

सूत्रम् :-

२.१६. कस्तरति मायां कस्तरति मायाम्? यः सङ्गाँस्त्यजति यो महानुभावं सेवते,निर्ममो भवति ।

भावः-

अत्र सूत्रमिदं प्रश्नोत्तरद्वयसंवलितं राराजते नारदस्य महर्षेः।

प्रश्नः- कः मायां तरति? कः मायां तरति?

उत्तरम् :- यः सङ्गान् त्यजति, यः महानुभावं सेवते, निर्ममः, भवति ।

सङ्गात् सञ्जायते कामः इत्यत्र सङ्गस्य वर्जनीयत्वं स्वयंगदितं भगवता श्रीकृष्णेन अपि च महानुभावसेवनं मायातरणतरणिः भवति च महानुभावानां सेवनेने निर्मानित्ता स्वयमायाति।

समन्वयः :-

श्रीमद्भागवतस्याद्ये स्कन्धे पञ्चमाध्याये नारदर्षिणा व्यासं प्रति महानुभावसेवनफलं प्रावोचि–

उच्छिष्ट लेपाद्यनुमोदितो द्विजैः संस्कृत्स्मभुञ्जे तदपास्तकिल्बिषः।
एवं प्रवृत्तस्य विशुद्धचेतसः तद्धर्म एवात्मरुचिर्व्यजायत ॥

१/५/२५॥

अत्र नारदः वदति यत् महतां महर्षीणां भक्तिमतां सेवनेन तेषां उच्छिष्टभोजनेन च मे समस्तानि पापानि हतानि, तेन च मे चित्तं विशुद्धिं लेभे ततः मे भक्तौ रुचिरजायत इति। नाम नारदः महतां सेवयैव भक्त्याचार्यपदं प्राप।

ततोऽहं पञ्चहायनः तदैव मे जननी उरगदंष्टा कालकवलीभूता तदाहं भगवतोऽनुग्रहं मन्यमानः उत्तरां दिशं प्रातिष्ठम्। अत्र नारदस्य निर्ममत्वं दृश्यते।

सङ्गत्यागः यथा तत्रैव –

एक एवातियातोऽहं अद्राक्षं विपिनं महत् ॥

१/६/१३॥

नारदेन भगवतो प्राप्तये न कस्यापि सङ्गः व्यधायि परं एक एव यातः तेनैव तस्य सा प्राप्तिः निर्बाधा व्यजायत। तत्रैव भगवान् स्वयं प्राह–

सत्सेवयाऽदीर्घयापि जाता मयि दृढा मतिः ।

नाम एतत्सर्वं महत्सेवाफलमेवावेहि यत् त्वं मां दृष्टवानसि।

इत्थं सम्पूर्णमपि सूत्रमिदं नारदेन स्वजीवनशिक्षितेन शिक्षणेन व्यरचीति मे प्रतिभाति।

श्रीहरिलीलामृताब्धौ सत्सङ्गिजीवने तुरीये प्रकरणे साधुभिः मायायाः तारणं कथं कर्तव्यमित्यत्र श्रीहरिराह –

आर्षभो भरतः पूर्वं जडविप्रो यथा भुवि ।
अवर्तताऽत्र परमहंसैर्वृत्यं तथैव तैः ॥

४/४४/१९६॥

अत्र आत्मनिष्ठाधिक्येन परमात्मचरणपद्मसमाश्रितत्वेन च साधुभिः जडविप्रवत् मानामानादिकमगणयित्वा अस्मिन् संसारे वर्तितव्यं तदैव मायातरणं शक्यं भवति।

अत्र परा मा यस्य सः परमः, नारायणः, । हंसः आत्मा नाम नारायणः आत्मा येषान्ते परमहंसाः तेषां या सङ्गत्यागमहापुरुषसेवननिर्ममधर्माः तैः मायतरणं सुलभमेव।

इत्थं सूत्रमिदं कथानकेन सह समन्वेति।

सूत्रम् :-

२.१७. स तरति स तरति, स लोकाँस्तारयति ।

भावः-

नारदाचार्यः वदति यत् यः कर्मफलानां त्यागी, कर्मणा संन्यासी, द्वन्द्वरहितः केवलं अखण्डभगवद्भक्तिपरायणः स तु अवश्यमेव तरति अपि तु स्वपितॄन् स्ववंशजान्, समाजम् राष्ट्रं च तारयति।

समन्वयः :-

श्रीमद्भागवते सप्तमस्कन्धे अष्टमाध्याये सः तरतीति सूत्रमेव प्रह्लादचरित्ररूपेण चित्रितमिति।

अखण्डभगवद्भक्तिपरायणः सर्वत्र हरिदर्शकः स्वयं तु तरति परमन्यानपि तारयति। सः एकान्तभक्तिः वर्तते ततः सर्वत्र अनुकरणेषु श्रीहरिं पश्यति तेनैव स्वपित्रा पृष्टश्चदा कुत्र ते हरिः?

क्वासौ यदि स सर्वत्र कस्मात् स्तम्भे न दृश्यते ।

७/८/१२३॥

तदैव भगवान् तत्तारणाय स्तम्भे प्रकटीबभूव–

सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु चात्मनः ।
अदृश्यतात्यद्भुतरूपमुद्वहन् स्तम्भे सभायां न मृगं न मानुषम् ॥

७/८/१८॥

सः भक्तराजः कथं तारितः भगवता तत्रोक्तं प्रह्लादेन –

क्वाहं रजः प्रभवईशतमोऽधिकेऽस्मिन् जातः कुरेतरकुले क्वतवानुकम्पा ।
न ब्रह्मणो न तु भवस्य न वै रमायाः यन्मेऽर्पितः शिरसि पद्मकरः प्रसादः ॥

७/८/२३॥

लक्ष्मीब्राह्ममहेशानामपि दुर्लभः असुरकुलसम्भूतस्य करकमलप्रसादः मया लब्धः ।

तारयति इत्यस्योदाहरणं यथा – भक्तश्रेष्ठः प्रह्लादः भगवता वरायोक्तोऽपि अखण्डां भक्तिमेव याचे च स्वपितुः दोषान्क्षन्तुं प्रार्थयामास तदा –

त्रिसप्तभिः पिता पूतः पितृभिः सह तेऽनघ ।
यत् साधोऽस्य गृहेजातः भवान्वै कुलपावनः ॥

७/१०/१८॥

भगवानाह ते जनकः एकविंशतिपूर्वजैः सह तव कुलपावनस्य जन्मना पूतः ।

इत्थमत्र सः सन्तीर्य स्वपूर्वजानामपि तारणं कृतवानिति सूत्रं सङ्गच्छते सर्वदा ।

सूत्रम् :-

२.१८. तत्प्राप्य तदेवावलोकयति तदेव श्रृणोति तदेव भाषयति तदेव चिन्तयति ॥५५॥

भावः-

यथा जनः द्विचक्रिकां प्राप्य ततः चतुष्चक्रिकां बहुमूल्यां लभते तदा पूर्वां द्विचक्रिकां विस्मरति नूतनामेव चतुष्चक्रिकां पश्यति इति सामान्यलोकेऽपि सामान्यपदार्थे यदि एवं क्रमः तर्हि पूर्णानन्दपरमचिदानन्दतेजोभाण्डागारं परमात्मानं प्राप्य न कस्यापि अन्यस्यदर्शनापेक्षा, नापि श्रवणापेक्षा नापि भाषणापेक्षा नैव चिन्तनापेक्षा जीवस्य जाते इति सूत्रार्थः ।

समन्वयः :-

श्रीमद्भागवतपुराणराजे दशमे हृदयस्थानीये स्कन्धे चतुश्चत्वारिंशेऽध्याये सूत्रार्थोऽयं वर्णितः यथा

या दोहनेऽवहनने मथनोपलेप प्रेङ्खेङ्खनाऽर्भरुदितोक्षणमार्जनादौ ।
गायन्ति चैनमनुरक्तधियोऽश्रुकण्ठयः धन्या व्रजस्त्रिय उरुक्रमचिन्तयानाः ॥

१०/४४/१५॥

अत्र गोप्यः भगवन्तमेकवारमवाप्य ततः सदा सर्वदा दोहनकर्मणि, दधिमन्थने, अवलेपकर्मणि, मार्जनादिकर्मषु च ताः तत्रैव परमात्मनि अनुरक्तबुद्धयः गद्‌गदस्वरेण गायन्ति, तच्चरित्राणि चिन्तयन्ति तस्मत्ताः धन्याः सन्ति ।

गोपीनां भाषणञ्च यथा –

एवं ब्रुवाणा विरहातुरा भृशम् व्रजस्त्रियः कृष्णविषक्तमानसाः ।
विसृज्य लज्जां रुरुदुः स्म सुस्वरं गोविन्द दामोदर माधवेति ॥

१०/३९/३१॥

अत्र विरहकारताणां कृष्णविष्टमानसानां त्यक्तलज्जानां भाषणे हे गोविन्द हे दामोदर हे माधव इत्यान्येव पदान्यासन् नान्यानि ।

गोपीगीते च ताभिरुक्तञ्चत् –

त्वामपश्यतां त्रुटिः युगायते ॥

१०/३१/१५॥

तत्रैव त्रिंशे चाध्याये गोपीनां तन्मयता प्रादर्शि –

तन्मनस्काः तदालापाः तद्विचेष्ठाः तदात्मिकाः ।
तद्‌गुणानेव गायन्त्यः नाऽत्मागाराणि सस्मरुः ॥

१०/३०/४३॥

अत्र गोपीनां चेतांसि वार्ताः चेष्टाः, आत्मनः, सर्वेऽपि भगवन्मयाः अतः तस्यैव परमपुरुषगानं कुर्वन्त्यः स्वगृहाणि विस्मृतवत्य इति ।

इत्थमत्र सर्वत्र सूत्रसङ्गतिः जायत एव ।

हरिलीलापरिपूर्णे सत्सङ्गिजीवने ग्रन्थे पञ्चमप्रकरणे अष्टषष्ठितमेऽध्याये श्रीहरिः यदान्तर्दधे तत्पूर्वं स्वभक्तानां मनोदशा एवमेवासीदिति वर्णितं तत्र –

किन्त्वद्यैव तिरोभूते मयि सर्वे मदाश्रिताः ।
मय्येवातिस्नेहभाजः देहान्हास्यन्ति तत्क्षणात् ॥

५/६८/१८॥

एते भक्ताः मयि एवातिस्नेहं दधानाः मयि स्वधामानुगते देहत्यागं करिष्यन्ति अतः मम विरहं सोढुमक्षमाणाम् एतेषां शान्तिं विधाय धाम यायाम् । तदा –

निपेतुः सहसा भूमौ रुदन्तो व्याकुलान्तराः ॥

५/६८/३०॥

इत्यनेन विरहभीरवः ते निश्चेष्टाः अभवन्। रोदनञ्च विदधुः। तत्र केचन मूर्छिताः अन्ये रुद्धनाड्यः, केचन नयनगलद्रुधिरबिन्दवः केचन विलापपरायणाः बुभूवुः।

अत्र एते सर्वे भगवन्तं प्राप्य साम्प्रतं तमेव मनसा वाचा कर्मणा सेवितुकामाः चिन्तयितुकामाः सन्ति।

इत्थमत्र सूत्रार्थसमन्वयं गच्छति।

सूत्रम् :-

२.१९. गौणी त्रिधा गुणभेदादार्तादिभेदाद्वा ॥५६॥

भावः-

इयं हि भक्तिः आर्तानां, जिज्ञासूनां, अर्थार्थिणाञ्च भेदात् त्रिप्रकारका सती अपरेत्युच्यते। यत्र कामना सा भक्तिः सकामा सा भक्तिशास्त्रे अपरा नाम्ना व्यपदिश्यते या निष्कामा सा पराभक्तिः कथ्यते।

समन्वयः :-

श्रीमद्भागवतस्य तृतीये स्कन्धे भगवता कपिलेन स्वभावेन, गुणैः भक्तेरनन्तत्वं प्रतिपाद्य पुनः सात्त्विक-राजस-तामस-आत्यन्तिकभेदेन सा चतुर्धा व्यभाजि।

अभिसन्धाय यो हिंसा .... ।
.... मयि कुर्यात् स तामसः ॥

अन्ते च

अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ॥
सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥
स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः ।
येनातिव्रज्य त्रिगुणं मद्भावायोपपद्यते ॥

३/२९/१२/१३/१४॥

अत्र आत्यन्तिकी भक्तिः उपदिष्टा यस्यां भक्तः भगवता दीयमान सालोक्यादिमुक्तिम् अकामयन्तः तस्य परमात्मनः सेवामेव वाञ्छन्ति। अनया भक्त्या आर्तजिज्ञासू अर्थाः इति त्रिगणं समाप्यान्ते भगवद्भावः सञ्जायत इति।

सूत्रम् :-

२.२०. लोकहानौ चिन्ता न कार्या, निवेदितात्मलोकवेदत्वात् ॥६१॥

भावः-

सुखन्तावद् द्विविधं गण्यते, लौकिकं पारलौकिकञ्च। तत्र लौकिकस्य यदि हानिः भवति चेत्तत्र न क्वपि चिन्ता विधेया भक्तेन यतो हि तस्य सर्वस्वं परमात्मने समर्पितं भवति।

भक्ताः त्यक्तलौकिकाः परमात्मदत्तसर्वस्वाः सकलकर्मपरमेश्वरर्पणाः प्रायः नास्य लोकस्य चिन्तां कुर्वन्ति।

समन्वयः :-

पुराणार्के श्रीमद्भागवते दशमस्कन्धे एकत्रिंशे गोपीगीताध्याये सम्पूर्णेऽपि सूत्रार्थोऽयं प्रतिपदं प्रतिपद्यं चावलोक्यते – तत्र

निवेदितात्मत्वं यथा –

त्वयि धृतावसवः त्वां विचिन्वते ॥

११/३१/२॥

अत्र व्रजाङ्गनानां प्राणाः परमपुरुषे श्रीकृष्ण एवं समर्पिताः सन्ति तादृश्यः त्वामेवान्विष्यन्ति न लोकं लौकिकं पदार्थं वा। अपि च –

अशुल्कदासिकाः ॥

१०/३१/२॥

इत्यत्रापि आत्मसमर्पणं गोपीनां स्पष्टमालोक्यते। तत्रैव चाग्रे –

शरणमीयुषां संसृतेर्भयात् ॥

१०/३१/२॥

इत्यत्रापि जगतः चिन्ता न कार्या यतो हि शरणागतानां समेषां संसारभयमपनयत्येव भवान्।

एवमेव तत्र लोकादप्यधिकं महत्त्वं भगवतः कथागुणगणश्रवणस्यादर्शि यथा –

तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहम्।
श्रवणमङ्गलं श्रीमदाततं भुवि गृणन्ति ते भूरिदाः जनाः ॥

१०/३१/९॥

अत्र संसारतापस्य निवृत्तिः कथाभिः परमपावनीभिः, सर्वविधं मङ्गलञ्च तासां श्रवणेनैव भवति, अतः न लोकहानौ चिन्ता विधेयेति।

तत्र पुनः –

पतिसुतान्वयभ्रातृबान्धवान् ।
अतिविलङ्घ्य तेऽन्त्यच्युतागताः ॥

॥१०/३१/१६॥

इत्यत्र पत्युः सुतानां कुलस्य भ्रातृणां बन्धूनाञ्च त्यागात् गोपीनां न समाजभयं लोकहानिः दृष्टा यतो हि ताभिः स्वीयं समस्तं सर्वस्वं भगवतेऽर्पितं कृतं वर्तते ।

सूत्रम् :-

२.२१. स्त्रीधननास्तिकचरित्रं न श्रवणीयम् ॥६३॥

भावः-

भगवतः साधकैः, भक्तैः भक्तिमार्गबाधकं तत्वं सूत्रेणानेन नारदमुनिना प्रादर्शि, स्त्रीणाम्, धनानाम्, नास्तिकानाञ्च चरितं वार्ता वा नैव श्रोतव्येति भावः ।

स्त्रीणां वार्ताभिः कामस्योद्रेकात् धनचिन्तनेन मानसिकरोगसम्भवात्,

"नास्तिको वेदनिन्दकः"

इत्युक्त्या नास्तिकचरितश्रवणेन वेदापराधात् नारदेन एतत्त्रयं न्यषेधि।

समन्वयः :-

वेदामृतभूतपुराणे श्रीमद्भागवते प्रह्लादमुपदिशता महर्षिणा नारदेनैव सूत्रार्थोऽयं विशदीकृतः यथा -

रायः, कलत्रं पशवः, सुतादयः गृहा मही कुञ्जरकोशभूतयः ।
सर्वेऽर्थकामाः क्षणभङ्गुरायुषः कुर्वन्ति मर्त्यस्यकियत् प्रियं चलाः ॥

७/७/३९॥

अत्र एतेषां नाम धन-पत्नी-पशु-पुत्र-गृह-पृथ्वी- गज-धन-ऐश्वर्याणि क्षणभङ्गुराणि सन्ति चलानि च वर्तन्ते तस्मान्न मर्त्यस्य प्रियं कर्तुं शक्नुवन्ति । अतः स्वयमफलत्वात्तत्त्वरित्राण्यपि नैव हितकराणि इति हेतोः त्याज्यान्यैव नैव श्रोतव्यानि इति नारदस्योपदेशः ।

तत्रैव द्वादशस्कन्धस्य द्वादशेऽध्याये सूतमुनिना भावोऽयमगादि-

मृषा गिरस्ता ह्यसतीरसत्कथा न कथ्यते यद्भगवानधोक्षजः ॥

१२/१२/४८॥

नाम स्त्रीधननास्तिकचरित्राणि मृषावाग्रूपाणि तस्मान्न तानि ग्राह्याणि नैव श्रोतव्यानि इति भावः ।

सूत्रम् :-

२.२२. त्रिरूपभङ्गपूर्वकं नित्यदासनित्यकान्ताभजनात्मकं प्रेमैव कार्यम्, प्रेमैव कार्यम् ॥६५॥

भाव:-

अत्र भगवति स्नेह एव कार्यः स्नेह एव कार्य इत्यत्र द्विरुक्तिः दाढर्याय कृता वर्तते। स च स्नेहः कथं कार्यः? इति प्रश्ने त्रिपभङ्गपूर्वकः नित्यदासनित्यकान्ता-भजनात्मकः इति पदद्वयं उत्तररूपं वर्तते।

पूर्वं त्रिरूपभङ्गः विचार्यते स्वामी-सेवक-सेवाः इति त्रिणि रूपाणि तासां भङ्गः तं कृत्वा नित्यं दास्यभावेन कान्ताभावेन एव भक्तिः कार्येति तद्रहः। अत्र भगवतः सततं सेवा कान्ताभावेन अथवा दास्यभावेनैव कार्या, तया च पराभक्तिः साध्यत इत्युक्तम्।

समन्वयः :-

श्रीमद्भागवते दशमे स्कन्धे षट्चत्वारिंशेऽध्याये नित्यदासत्वेन नित्यकान्तात्वेन कृतसेवायाः फलं न्यगादि श्रीकृष्णेन स्वयम्-

गच्छोद्धव व्रजं सौम्य पित्रोर्नौ प्रीतिमावह।
गोपीनां मद्वियोगाधिंमत्संदेशैर्विमोचय ॥

१०/४६/३॥

अत्र भगवतोद्धवः स्वयमादिष्टः व्रजं गन्तुं किमर्थमिति चेत् नित्यकान्ताभूतानां प्राणप्रियानां व्रजाङ्गनानां वियोगव्याधिविनाशाय इति।

ततश्चाग्रे स्वयं भगवानुवाद-

ताः मन्मनस्काः मत्प्राणाः मदर्थे त्यक्तदैहिकाः।
मामेव दयितं प्रेष्ठं आत्मानं मनसा गताः ॥

१०/४६/३०॥

ताः गोप्यः मयि अर्पितचित्ताः मदर्थमेव प्राणधारिण्यः मह्यमेव च त्यक्तशरीरभावाः मामेव स्नेहरूपेण प्रेष्ठं मन्यमानाः मनसापि मामेवाप्ताः अतः कष्टेन प्राणं धारयन्त्यः ताः शान्त्वय मम प्रियवाक्यैः।

अत्र गोपीनां नित्यदासकान्ताभावेन भक्ति कारणात् स्वयं श्रीहरिः तासां चिन्तां करोति एतदेव स्नेहमाहात्म्यम्।

सूत्रम् :-

२.२३. काण्ठावरोधरोमाञ्चाश्रुभिः परस्परं लपमानाः पावयन्ति कुलानि पृथिवीञ्च ॥६७॥

भावः-

भक्ताः भगवद्भावभरिताः गलितभावाः सहृदयहृदयाः परस्परं भगवद्हगुणगानपरायणाः स्ववंशस्य पावकाः भवन्ति, नैतावदपि तु धरामपि पवित्रीकुर्वन्ति।

ते कीदृशाः भक्ताः? तर्हि कण्ठस्तम्भनपूर्वकाः, उद्गतरोमाणः बाष्पवृत्तिकलुषनयनाः मिथः भक्तेरालापं कुर्वाणाः भवन्ति।

कण्ठावरोधरोमाञ्चाश्रुपूर्णनेत्राः भक्ताः इत्यत्र एते सर्वे आन्तरिकभावनायाः बाह्यलक्षणभूताः प्रकाशिकाः सन्ति। अत्र एतादृशी स्नेहभक्तिः त एव भगवदैक्यं साधयितुमर्हाः भवन्ति।

समन्वयः :-

सात्वतानां संहिताभूते भक्त्यैकलक्ष्ये श्रीमद्भागवते दशमे स्कन्धे एकोनचत्वारिंशचतुश्चत्वारिंश-षड्चत्वारिंशेषु अध्यायेषु सूत्रार्थोऽयं बहुविशदरीत्या प्रकटीकृतः व्यासमहर्षिणा यथा –

एवं ब्रुवाणा विरहातुरा भृशं व्रजस्त्रियः कृष्णविषक्तमानसाः।
विसृज्य लज्जां रुरुदुः स्म सुखरं गोविन्द दामोदर माधवेति ॥

१०/३९/३१॥

अत्र विरहातुराणां गोपीनामश्रुपातः रुदुदुः इति पदेन स्पष्ट एव। तासां रोदनेऽपि गोविन्द दामोदर माधवेति इत्येव नामान्यासन् तन्मयत्वात्।

अग्रे च पञ्चचत्वारिंशेऽध्याये **सर्वार्थसम्भवो देहः जनितः पोषितः यतः** इत्यादिभिः महत्त्वं प्रत्यपीपदत् तदा मायामनुष्यस्य हरेः मोहितौ तमङ्कमारोप्य परमां मुदं लेभाते च –

सिञ्चन्तावश्रुधाराभिः स्नेहपाशेन चावृतौ।
न किञ्चिदूचतुरूजन् बाष्पकण्ठौ विमोहितौ ॥

अत्र देवकीवसुदेवयोः कण्ठः बाष्पावृत्तः चाश्रुधारा अपि पतन्ति तस्मान्न शेकाते वक्तुं किमपि।

अत्र एतौ स्वयं पूतौ च स्वपुत्रत्वेनावाप्य गोविन्दं जगदपि पवित्रितमिति। नन्दयशोदयोरपि स्थितिरियमेव अवलोक्यते षट्चत्वारिंशेऽध्याये यथा –

इति संस्मृत्य संस्मृत्य नन्दः कृष्णानुरक्तधीः ।
अत्युत्कण्ठो भवत्तूष्णीं प्रेमप्रसरविह्वलः ॥

१०/४६/२७॥

यशोदा वर्ण्यमानानि पुत्रस्य चरितानि च ।
शृण्वन्त्यश्रूण्यवास्त्राक्षीत् स्नेहस्नुतपयोधरा ॥

१०/४६/२८

सूत्रम् :-

२.२४. तन्मयाः ॥६९॥

भावः-

ते तीर्थानि पावयन्ति, कर्माणि भव्यानि कुर्वन्ति, शास्त्राणि सञ्जीवयन्ति इत्यत्र कारकं किम्? इत्यस्योत्तरं सूत्रेणानेन दीयते।

सामान्य कर्मण्यपि तन्मयत्वमावश्यकं, तर्हि एतादृशे भव्ये दिव्ये च कर्मणि भगवतः अनन्यपरायणता सर्वथा परमावश्यकी।

समन्वयः :-

पुराणतिलके श्रीमद्भागवते हृदयस्थानीये स्कन्धे त्रिंशत्तमेऽध्याये गोपीनां तन्मयता प्रादर्शि व्यासमहर्षिणा यथा –

तन्मनस्कास्तदालापाः तद्विचेष्टाः तदात्मिकाः ।
तद्गुणानेव गानयन्त्यो नात्मागाराणि सस्मरुः ॥

१०/३०/३३॥

नारदेन महर्षिणा पूर्वमेवावोचि भक्तिसूत्रेषु "यथा व्रजगोपिकानाम्" इत्यत्र भक्तिस्तु व्रजाङ्गनानामेव उत्तमा इत्यत्र कारणानि प्रदर्श्यन्ते पद्येनानेन ताः तन्मनस्काः नाम कृष्णचित्ताः तासां चिन्तनं मनोव्यापारः कृष्णपर एव वाणी अपि तस्यकृष्णपरमात्मनः गुणगाने एव प्रवर्तते, सर्वाः चेष्टाः अपि कृष्णपरा एव आत्मव्यापारोऽपि मदनमोहनपरायण एव गानमपि तस्यैव गुणान्तं तेन करणेन ताः धन्याः सन्ति।

श्री स्वामिनारायणलीलापरिपूर्णे सत्सङ्गिजीवने ग्रन्थरत्ने आद्ये प्रकरणे' प्राणनेत्राध्याये भगवतो बाललीलालालनप्रसङ्गे सर्वेषामपि तन्मयता दृश्यते –

बालं तं लालयन्तीनां योषितां स्निग्धचेतसाम् ।
नाभूत्स्वपरभेदो वै सर्वासामपि भूपते ॥

१/२५/१४

इत्यत्र लालयन्तीनां सर्वासामपि तन्मयत्वात् स्व-परभेदोऽभाजि । अपि च -

वृद्धास्तं पुत्रभावेन भ्रातृभावेन चापराः ।
लालयन्त्यो दिवारात्रौ सस्मरुः न गृहान्निजान् ॥

१/२५/१५॥

इत्यत्र तासां सर्वासामपि वृद्धानां श्रीघनश्याममयत्वात् अहर्निशं स्वीयागाराणि न स्मृतिपथमागच्छन् । कारणं तु तासां तन्मयत्वमेव दृश्यते ।

एवमत्र "**तन्मयाः**" सूत्रमिदं सर्वथा सर्वरूपेण समन्वयमेति ।

सूत्रम् :-

२.२५. सर्वदा सर्वभावेन निश्चिन्तितैः भजनीयः ॥७८॥

भावः-

मनुष्याणां नित्यनवीनत्वात् सर्वदा सर्वैः भावैः चिन्ताराहित्येन भजनीयः केवलमेक एव वर्तते, स च भगवान् श्रीकृष्ण एव वर्तते ।

शाश्वतः श्रीकृष्ण एव जगदशाश्वतं तेन शाश्वति कृता भक्तिरेव शाश्वता भवति अशाश्वते जगति कृता न तथा भवत्यतः काम-क्रोध-प्रेमभावैः तस्यैव परमात्मनः भजनं वरं नेतरदिति ।

समन्वयः :-

श्रीमद्भागवते पुराणशिरोमणिभूते मुनिसङ्ख्याके स्कन्धे आद्येऽध्याये सूत्रार्थोऽयं वर्णितः वर्तते ।

गोप्यः कामाद्भयात्कंसः द्वेषाच्चैद्यादयो नृपाः ।
सम्बन्धाद् वृष्णयः स्नेहाद् यूयं भक्त्या वयं विभो ॥

७/१/३०॥

अत्र सूत्रार्थोऽयं श्रीनारदेनैव युधिष्ठिरं प्रति वर्णितः । यथा व्रजाङ्गनानां कामभावोऽतः ताः तेन भावेन भगवन्तुमापुः, कंसस्य भयभावः आसीत्तेन, चैद्यादयो भूभुजः श्रीकृष्णं प्रति द्वेषेण, वृष्णयः सम्बन्धभावेन, भवन्तः पाण्डवाः स्नेहेन भावेन, वयं नारादाद्याः मुनयः भक्त्या तमेव परमपुरुषं, अनेकजन्मसंसिद्धप्राप्यं, श्रीकृष्णं प्राप्तवन्तः । अत्र सर्वैः भिन्न भिन्न भावेन सर्वदा स एव भक्तः च तैः सर्वैः योगिदुर्लभं पदमलभ्भि । अतः भावः प्रधानः ।

१०

आगमग्रन्थैस्सह तुलनात्मकोऽभ्यासः ।

१. प्रास्ताविकम् आगमभेदाः ।

२. आगमविषयाः। पाञ्चरात्रम् ।

३. प्रवर्तक-प्रचारकौ।

४. नामाभिधानम् ।

५. पाञ्चरात्रमेवं नारदः ।

६. पाञ्चरात्रस्य सात्त्वतसंहिता।

७. प्राचीनपरम्परा।

८. परिचयः ।

९. पाञ्चरात्रशब्दोत्पत्तिः ।

१०. पाञ्चरात्रप्रामाण्यम् ।

११. आचारतन्त्रे भक्त्युपकारकाणि तत्त्वानि ।

१२. भक्तिमार्गे दीक्षाविधानावश्यकता।

१३. दीक्षालक्षणम्, दीक्षाभेदाः ।

१४. आचार्यलक्षणम् ।

१५. दीक्षितलक्षणम् ।

१६. भगवद्स्वरूपम् ।

१७. अर्चनभक्तेः प्राधान्यम् ।

१८. प्रतिमाभेदाः ।

१९. तन्त्रराद्धान्ताः, तत्र व्यूहनिरूपणं च ।

२०. विभवविस्तरः ।

१. प्रास्ताविकम् :-

भारतीयसंस्कृतसाहित्येऽन्यशास्त्रवदागमशास्त्रस्यापि माहात्म्यं वरीवर्ति। तत्र प्रथमं कस्तावदागमपदार्थः इति विचार्यते।

आगमपदार्थः :-

कस्तावदागमपदार्थः इति जिज्ञासायामुच्यते। तत्र वैदिकसाहित्ये निगमागमश्चेति द्वौ शब्दौ दृश्यते। तत्र निगमशब्दस्तावद्वेदवाची तत्र प्रमाणञ्च यास्काचार्यः यतो हि तेन यत्र तत्र सर्वत्र भाष्ये। "**निगमो भवतीति**" इत्यनेन वेदवाक्यान्यैव समुद्धृतानि। "निरुक्ते निगम एव बाहुल्येन वर्तमानशब्दानां चतुर्थाध्यायस्य द्वितीये काण्डे उपदिष्टत्वात्तस्य काण्डस्य नैगमत्वम्" इति निगमपदार्थनिरूपणं माधवाचार्यैः निरुक्तप्रयोजनावसरे व्यधायि अतः निगमो वेदः। तस्य प्रतिद्वन्द्वितया आगमपदस्योत्पत्तिरजायत।

शब्दकल्पद्रुमकारः आगमलक्षणमेवं ब्रूते –

सृष्टिश्च प्रलयस्यैव देवतानां यथार्चनम्।
साधनञ्चैव मन्त्राणां पुरश्चरणमेव च।
षट्कर्मसाधनञ्चैव ध्यानयोगश्चतुर्विधः।
सप्तभिर्लक्षणैः युक्तं त्वागमं तद्विदुर्बुधाः॥

परन्त्वत्र केषाञ्चन मतमस्ति यत् प्राचीनकालादेव निगमप्रतिद्वन्द्विनिष्ठाः सौगतार्हतादयः आगमसम्प्रदायं समाशिश्रियुः। व्यतीते च काले निगमनिष्ठा अपि सकलप्राणभृतां नि श्रेयःकामनया आगमसम्प्रदायं प्रवर्तयामासुः।

ततो ह्येष आगमः वैदिकावैदिकभेदाद् द्विधा विभक्तः।

इदञ्चागमपदं पुरा तु शास्त्रायैव मन्वादिभिराचार्यैः प्रायुञ्जि। तद्यथा,

प्रत्यक्षमनुमानञ्च विभिन्नागमदर्शनैः।
अनुपासितवृद्धानां विद्या नातिप्रसीदति॥

– मनु. अ. १२

परन्त्विदानीन्तु आगमशब्दोऽयं शब्दप्रमाणमात्रे प्रयुज्यते।
व्यतीते च काले शब्दोऽयं तन्त्रपदेनापि व्यवहारे दृश्यते। निगमो मन्त्रपर्यायः, आगमश्च तन्त्रपर्यायः, तपःपूतेन निरूपणाच्च तन्त्रः।
इत्थञ्च बहुचर्चिते सारस्तु तनुभृतां जीवानाम् अखिलव्यवहारानुकूलः सर्वशास्त्रसंग्रहः तन्त्रसन्दर्भ इत्यागमविदामभ्युपगमः।

आगमभेदाः :-

त इमे किलागमाः बहुशो विभक्ता अवगम्यन्ते। उक्तञ्च तन्त्रवार्तिके –

"**साङ्ख्य-योग-पाञ्चारात्र-पाशुपत-शाक्य-निर्ग्रन्थ-धर्माधर्म-निबन्धनानि चिकित्सा वशीकरणोत्त्वाटनोन्मादनादि-समर्थकतिपर्यमन्त्रौषधि-कदाचित्क-सिद्धि-निदर्शन बलेनाहिंसा-सत्यवचनदम-दान-दया-श्रुति-स्मृतिसंवादि स्तोकार्थ-गन्धवासित जीविका-प्रायार्थान्तरोपदेशीनि, यानि च ममेच्छाचारमिश्रकुभोजनाचरणनिबन्धनानि, तेषामेवैतत् श्रुतिविरोध-हेतुदर्शनाभ्यानपेक्षणीयत्वं प्रतिपाद्यते।**"

इत्थमत्र आगमभेदान् प्रदर्श्य तेषु म्लेच्छाचारमिश्रिततत्त्वानां निरूपणाद् अनपेक्षँणीयत्वमुक्तम् वेदादिसच्छास्त्रविरुद्धत्वाद् इति विवेकः।

परन्तु नात्र कश्चित् सन्देहः यत् संस्कृतवाङ्मये आगमसाहित्यमतिमहत्त्वपूर्णं पदमलङ्करोति। आगमशास्त्रस्यावतरणं तत्प्रतिपाद्यविषयाणामुल्लेखश्च तन्त्रग्रन्थेषु बहुश उपलभ्यते।

भगवता वाचस्पत्तिमिश्रेण तत्त्ववैशारद्याम् आगमपदमेव व्याख्यायि – **आगच्छन्ति बुद्धिमारोहन्ति यस्माद् अभ्युदयनिःश्रेयसोपायाः स आगमः।**

२. आगमविषयाः :-

आगमतन्त्राणामनुशीलनेन अवगम्यते आगमस्य विषयद्वैविध्यम्। तत्र वेदमूलकत्वम् आद्यं वेदबाह्यत्वञ्च द्वितीयम्। तत्र पाञ्चरात्रशैवागमदीनां कतिपयसिद्धान्ताः तु वेदावल्बिनः प्रतीयन्ते। इतरे वेदबाह्याः ज्ञेयाः सर्वत्रागमेषु अद्वैत्तविषयकाः सिद्धान्ताः भूम्नोपनिषन्मूलका एव।

तत्र शाक्तागमानां त्रयो भावाः सप्त चाचाराः सम्भवन्ति।

पाञ्चरात्रम् :-

वैष्णवतन्त्रेषु पञ्चरात्रमतीव महनीयमहत्त्वपूर्णञ्च स्थानं बिभर्ति तन्नाविदितं तत्र भवतां भवताम्। तदेतत् पाञ्चरात्रमतीव प्राचीनं प्रतीयते। इदंतया एतस्य कालनिर्णयः साधनाभावात् कर्तुं न शक्यते। तथाप्यत्र किञ्चिदैतिह्यमाभणन्ति तान्त्रिकाः तद्यथा – यत्पुरा देवर्षिनारदस्य हृदये पाञ्चरात्रजिज्ञासा जागृता, ततः देवर्षिणा तेन भारतवर्षस्योत्तरप्रदेशस्थितस्य नारायणमुनेः सकाशात्तन्त्रमिदमलम्भि। ततः तेन सम्पूर्णे भारतेऽस्य प्रचारः व्यधायि।

३. प्रवर्तकः :-

एतेन पूर्वकथनेन सिद्धं यदस्य आद्यः प्रवर्तकः नारायणमुनिरेव।

सम्बन्धः :-

अस्य पाञ्चरात्रस्य वेदांशत्वेनैव स्वीकारः वेदस्यैकायनशाखया चास्यागमस्य सम्बन्धः इति स्वीकारः। एकायनस्य वर्णनं छान्दोग्योपनिषदि दृश्यते। यथा – "ऋग्वेदं

भगवोऽध्येमि .... वाकोचाक्यमेकायनमिति ॥

प्रचारकः :-

अस्य पाञ्चरात्रागमस्य प्रचारकबाहुल्येऽपि दशमशताब्दीसमुत्पन्नः आचार्योत्पल एव शेखरायते। आचार्येणानेन स्वस्य स्यन्दकारिकायां पाञ्चरात्रश्रुतेः पाञ्चरात्रोपनिषदश्च बहून्युदाहरणानि समुद्धृतानि। तेनानुमीयते यत् पाञ्चरात्रम् त्रेधाविभक्तमिति यथा **पाञ्चरात्रस्मृतिः पाञ्चरात्रोपनिषत्, पाञ्चरात्रसंहिता** इति। अपरेण एकादशशताब्दीसंभूतेन भगवता यामुनाचार्येण स्वरचितप्रामाण्यचनद्रिकायां पाञ्चरात्रग्रन्थानां नामानि अलेखिषत।

ख्यातिः :-

एतत्पाञ्चरात्रं भागवतधर्मः सात्वतधर्मः इति नाम्ना ख्यातिं लेभे। अयञ्च सात्वतधर्मो महाभारतेऽपि उल्लेखि व्यासेन यथा –

सात्त्वतं विधिमास्थाय संगीतः संकर्षेण यः।
द्वापरस्य युगस्यान्ते आदौ कलियुगस्य च ॥

– महाराभारत भीष्मपर्व

शतपथब्राह्मणेऽपि पाञ्चरात्रस्य वर्णनं सम्प्राप्यते। एवमैतरेयेऽपि एतस्यां दक्षिणस्यां दिशि ये केचन सात्वता राजानो भोज्यायैव तेऽभिषिच्यन्ते इति च्

४. नामाभिधानम् :-

अस्य पाञ्चरात्रनामाभिधाने समस्तप्राणिषु एकाधिपत्यप्राप्त्यर्थं पञ्चदिवसपर्यन्तमनुष्ठानं बीजम्।

आगमशास्त्रमिदं वैदिकमवैदिकमिति द्विधा प्रपञ्चः मतिमतां शेमुषीजुषां परं भवतु नाम यद्वा तद्वा विद्वांसो विपश्चित एवात्र प्रमाणम्। मया तु सङ्ग्रहेण आगमप्रतिबिम्ब एवात्र बिम्बितम्।

पाञ्चरात्रमेवं नारदः पाञ्चरात्रस्य सात्वतसंहिता, अस्य प्राचीनपरम्परा तद्परिचयश्च।

५. **पाञ्चरात्रमेवं नारदः :-**

भागवतधर्मोपासकानां समुदाये पाञ्चरात्रमशास्त्रं सादरं सगौरवं स्थानं भजते। महाभारतब्रह्मसूत्रश्रीभाष्याणां पाञ्चरात्राधिकरणेषु पाञ्चरात्ररक्षादिग्रन्थेषु च शास्त्रस्यास्य पूर्णः परिचयः प्राप्यते।

पाञ्चरात्रशास्त्रमिदं स्वानेकविशेषताभिः प्रधानत्वाच्च मन्त्रसिद्धान्तः, आगमसिद्धान्तः, तत्त्वसिद्धान्तः च तन्त्रसिद्धान्तः इति चतुर्षु भागेषु विभक्तं दृश्यते। इत्थं चतुर्धा विभक्तस्य शास्त्रस्यास्य पादपद्मोद्भवादिभिः नामभिः प्रथिताः प्रसिद्धाश्च अष्टोत्तरशतं संहिताः भगवन्मुखकमलनिःसृतत्वात् विशिष्य प्राधान्यं भजन्ते।

अत्र रत्नत्रयान्तर्गता या सात्वतसंहिता सा भगवता वासुदेवेन भगवते सङ्कर्षणाय द्वापरान्ते कलिप्रारम्भे श्राविता। परम्पराप्राप्तमिदमेव पाञ्चरात्रं देवर्षिणा नारदेन अन्यमहर्षिभ्यः मलयाचलनगे श्रावितम्।

महाभारते अस्याः सात्वतसंहितायाः उपदेशः अनेन प्रकारेण प्राप्यते –

ब्राह्मणैः क्षत्रियैः वैश्यैः शूद्रैश्च कृतलक्षणैः।
अर्चनीयश्च सेव्यश्च कीर्तनीयश्च सर्वदा॥
सात्वतं विधिमाश्रित्य गीतः सङ्कर्षणेन यः।
द्वापरस्य युगस्यान्ते ह्यादौ कलियुगस्य च॥

– म.भा.शा.प. (अं ७२.७.८)

अत्रायं भावः शङ्खचक्राङ्किताः भक्ताः ब्राह्मणक्षत्रियवैश्यशूद्रा अपि भगवन्तं वासुदेवम् अर्चितुं कीर्तयितुं शक्नुवन्तीति।

६.६. **सात्वतसंहिता :-**

इयं सात्त्वतसंहितैव नारदपाञ्चरात्रागमनाम्ना प्रथिता प्रसिद्धा च वर्तते। अस्यां संहितायां **पञ्चविंशतिपरिच्छेदाः ३४९२** पद्यानि च वर्तन्ते।

अस्याध्ययनेन ज्ञायते यत् पूर्वकाले या पाञ्चरात्रसंहिता भगवता वासुदेवेन सङ्कर्षणायाध्यापिता तेन च नारदायाध्यापिता सैव नारदेन महर्षिभ्यः भगवता वासुदेवेन सङ्कर्षाणायाध्यापिता, तेन च नारदायाध्यापिता सैव नारदेन महर्षिभ्यः मलयाचलपर्वते पाठिता।

अत एव पाञ्चरात्रशास्त्रमिदं भगवता स्वयं वर्तते च सात्वतसंहितानाम्ना प्रथितिं भजते। अस्यां संहितायां परिच्छेदक्रमेण (१) शास्त्रावतरणम् (२) उपासनाविधिः

(३) सुषुप्तिव्यूह-मन्त्रोद्वारः (४) सूक्ष्मव्यूहदेवतोभययोगदिधिः (५) चतुरात्म्याराधनविधिः (६) व्रतविधिः (७) सांत्सरव्रतविधिः (८) विभवदेवतोभययोगविधिः (९) मण्डलध्यानविधानम् (१०) कुण्डलक्षणवर्णनम् (१२) पातालनिलयः (१३) भगवदस्त्राभूषणदेवताध्यानविधिः (१४) स्नानविधिः (१५) दीक्षाङ्गभूतपापशान्तिः (१६) कल्पवर्णनम् (१७) नृसिंहमन्त्रोद्धारः (१८) अधिवासदीक्षाविधिः (१९) वर्णाध्वविज्ञानविधानम् (२०) आचार्याभिषेकविधिः (२१) समयाचारविधानम् (२२) मुद्राभेदवर्णनम् (२३) विभवदेवतापिण्डमन्त्रोद्धारवर्णनम् (२४) प्रतिमाप्रासादलक्षणानि (२५) प्रतिष्ठाविधिः इत्येतेषां सविस्तरं वर्णनं वर्तते।

उल्लिखितविषयविवरणेन ज्ञायते यदियं सात्वतसंहिता यात्राचार्याः महोपनिषदं वदन्ति सा सात्वधर्मावलम्बिनां भक्तानां परमोपादेयतां बिभर्ति।

यद्यपि पाञ्चरात्रस्य निखिलसंहितानां विशेषणं सात्वतशब्दः भवितुमर्हति तथापि महाभारतवचनप्रामाण्येन च भीष्मपितामहदर्शितभगवदाराधनेन इयमेव सात्वतसंहिता नारदपाञ्चरात्रस्येति सिद्ध्यति।

नारदपाञ्चरात्रशास्त्रम् आत्मभरन्यासस्य प्रपत्तिमार्गस्य च सर्वोत्तमं सहायकञ्च शास्त्रमस्ति। इदं हि भागवतधर्ममूलं च सांसारिकजीवानां भवसागरतरतरणिः वर्तते।

अस्य शास्त्रस्य परम्परादर्शनेन ज्ञायते यत् शास्त्रमिदं समये समये नैकैः महापुरुषैः प्रकटीचक्रे तेन अस्य प्रवर्तकबाहुल्यमपि सिद्ध्यति तथापि वर्तमाने यत्पाञ्चरात्रं प्रचलितं विशिष्य महाभारतकालादारभ्य अद्यावधि यः सात्वतधर्मः प्रवर्तते, एतस्य मुख्यप्रवक्ता प्रचारकः आचार्यश्च देवर्षिः नारद एवेति समस्वरं जोघुष्यते मया। तेनैव च परमभागवतेषु अस्य सर्वाधिकं प्राधान्यमपि सिद्धं भवति।

७. / ८ परम्परा :-

पाञ्चरात्रशास्त्रस्य परम्पराविषये महाभारते लिखितञ्चत् राजा जनमेजयः श्रीवैशम्पायनं पप्रच्छ हे मुने! लोकेऽस्मिन् नष्टवासनाः पुण्यघरहिताः ते वासुदेवमाप्नुवन्ति। निष्कामः भक्तः परमपदं लभते, तेनाहमुनिनोमि यद् एकान्तिकभक्तिरेव नारायणायाधिकं रोचते। योगिभ्यः ज्ञानिभ्योऽपि एकान्तिकभक्तानां गतिरुत्तमेति जानामि। अतः एकान्तिकभक्तेः कः प्रवर्तकः? तदाचरणं कीदृशम्? इति मे वर्णयतु।

जनमेजयस्य प्रश्नेऽस्मिन् वैशम्पायनमुनिना अकथि– हे राजन्! पाञ्चरात्रशास्त्रेऽस्मिन् वर्णितं त्वयोक्तं आदौ स्वयं नारायणेन शास्त्रमिदं दध्रे । अस्य शास्त्रस्य परम्पराविषये महाभारतकालेऽर्जुनः श्रीकृष्णभीष्मपितामहादीनां समक्षं नारदं पप्रच्छ तदा नारदश्च जगाद् –

हे पार्थ! आदौ युगे श्रीमन्नारायणमुखाद् ब्रह्माजायत तदा स्वयं नारायणः अनेन सात्वतधर्मेण देवपितृकार्याणि चकार । तस्मात् फेनपाः ऋषयः धर्ममिमं लेभिरेततश्चधर्मोऽयमन्तर्दधे ।

हे राजन् पुनःब्रह्मा चाक्षुषं जन्म लेभे । तदा चन्द्राद् धर्ममिममश्रौषीत् ब्रह्मा, तस्माद्रुदः अश्रुणोत् । तेन बालखिल्यादिमुनिभ्यः ज्ञानमिदम् अदायि पुनः अन्तर्दधे ।

पुनः ब्रह्मणः महद्वाचिकनामकं जनुः अवाप, तदा स्वयं नारायणादस्य प्रचारोऽजायत ततश्च सुपर्णनामा ऋषिः शास्त्रमिदं समवाप ।

तेनऋषिप्रवरेण पाञ्चरात्रशास्त्रमिदं त्रिधावृत्तं तस्मादिदं त्रिसौपर्णव्रतरूपमुच्यते । पुनः ब्रह्मणः श्रवणजं जन्म जातं तदा नारायणनेन सात्वतधर्मोऽयमपाठि तं ब्रह्माणम् । तेन स्वरोचिषमनवे प्रोक्तः स च स्वपुत्राय शङ्खपादाय प्रावोचत् तेन सुवर्णाभाय दत्तः धर्मोऽयम् ।

महाभारते च भीष्मपितामहः युधिष्ठिरं (शा. प. ३३४) प्राह यदयं सात्वतधर्मः प्रतियुगं प्रतिकालं सन्तिष्ठत एव इति ।

९. पञ्चरात्रशब्दोत्पत्तिः :-

कोऽर्थः पञ्चरात्रशब्दस्येति जिज्ञासायामुच्यते –

(१) यस्य सन्निधौ पुराणानि, वेदाः, वेदान्तम्, साङ्ख्यम्, योगश्चेति पञ्च दर्शनानि रात्रिवत् श्यामतां प्राप्नुवन्ति तत् पञ्चरात्रम् (पौ. सं. ६८/३०७,३०८)

अत्रान्यदर्शनेभ्यः शास्त्रस्यास्य उत्कृष्टता प्रदर्श्यते ।

(२) पञ्चरात्रिषु ज्ञानप्राप्तित्वात् पञ्चरात्रिमित्यपरोऽर्थः । आदौ कृतयुगे – (१) अनन्तः (२) गरुडः (३) विष्वक्सेनः (४) शिवः (५) ब्रह्मा इति पञ्चभिः क्रमशः पञ्चसु रात्रिषु नारायणसकाशाद् ज्ञानमिदं प्राप्तं तेन पाञ्चरात्राभिधं शास्त्रमिदम् । अत्र प्रमाणञ्च विहगेन्द्रसंहिता प्रथमपटलम् ।

(३) पञ्च – अज्ञाननाशकः रात्रिः अज्ञानमिति द्वयं मिलित्वा अज्ञाननाशकं शास्त्रं पाञ्चरात्रमिति । (श्रीप्रश्नसंहिता – २/४०)

(४) पञ्च – इन्द्रियाणि, भूतानि, विषयाः ।

रा – आदानार्थाकधातोरूपलक्षकः ।

त्र – त्राण – रक्षणार्थोपलक्षकः

पञ्चेन्द्रियाणां, पञ्चभूतानां, पञ्चरूपरसादिगुणानाञ्च आदातुः जीवात्मनः पालकं संरक्षकं पञ्चरात्रशास्त्रमित्यर्थः फलति ।

– विश्वामित्रसंहिता – २/३–५)

(५) पञ्चविधज्ञानस्य बोधकं पञ्चरात्रमित्यर्थोऽपि स्फुटति ।

– ज्ञानामृतसारसंहिता (१/१/४४–५२)

१०. पाञ्चरात्रप्रामाण्यम् :-

अस्य पाञ्चरात्रस्य श्रुतिरूपत्वं नारायणमुखकमलनिर्गत्वादुक्तं श्रीप्रश्नसंहितायाम् –

वेदमेकायनं नाम वेदानां शिरसि स्थितम् ।
तदर्थकं पञ्चरात्रं मोक्षदं तत्क्रियावताम् ॥
यस्मिन्नेको मोक्षमार्गो वेदे प्रोक्तः सनातनः ।
मदाराधनरूपेण तस्मादेकायनं भवेत् ॥

अस्य प्रामाण्ये श्रीकुमारिलभट्टेन प्रथममशङ्कि तन्त्रवार्तिके, ततश्च शङ्कराचार्यैः ब्रह्मसूत्रभाष्ये द्वितीयाध्यायस्य द्वितीये पादे उत्पत्यसम्भवाधिकरणे काश्चन शङ्काः समुदभाविषत ।

परं श्रीयामुनाचार्येण आगमप्रामाण्ये, श्रीमद्भिः रामानुजाचार्यैः श्रीभाष्ये, श्रीवेदान्तदेशिकेन पञ्चरात्ररक्षायां प्रामाण्यशङ्कां निराकृत्य अस्य प्रामाण्यं समुपस्थापितम् ।

अस्यैव आगमशास्त्रस्य रचितानि मन्दिराणि तत्र जायमानाः महोत्सवाः, जनमानसव्याप्ताः न कथमपि निराकर्तुं शक्याः । सूर्यनिराकरणवदशक्यमस्य निराकरणमिति दिक् ।

तत्रागमशास्त्रेषु श्रीपाञ्चरात्रे सात्वतसंहिताया अपूर्वं महनीयञ्च स्थानं वर्तते तत्र नारदस्य भक्तिः स्फूटरूपेण दृश्यते – यथा प्रथमपरिच्छेदे प्रारम्भ एव ।

ज्ञात्वा तस्याचलां भक्तिं देवः परशुलाञ्छनः ।
प्रत्यक्षमगच्छश्वत् सानुकलम्पेन चेतसा ॥

(१.३)

तत्रैवार्चनभक्तेरुदाहरणं स्पष्टमेव अवलोक्यते नारदमुखेन –

पूजयामास तं देवमष्टांगपतनादिना । (१.४)

तत्र भक्तेः जन्मनाशकत्वं सूचयन्नाह परशुरामः यद् अचला भक्तिः जन्मनः यद् बीजं वर्तते तन्नाशकरी भवतीति । यथा –

तवास्तिभक्तिश्चला जन्मबीजक्षयङ्करी । (१.५)

तत्र शुद्धाभक्तेः सात्वतभक्त्याः एकान्तिकायाः स्थानं दृढयन्नुक्तं परशुरामेण यत् –

एषा तु सात्वती शुद्धा नित्यमव्यभिचारिणी ।
तिष्ठन्ति मुनयो ह्यत्र प्रार्थनायाः हरेः पदम् ॥ (१.६)

तत्रैव मुनयः सर्वे नारायणपदप्राप्तये को मार्गः वरीयानिति पप्रच्छुः तदा श्रीसात्वतसंहितायां अर्चनभक्तेः सुविस्तृतं च वर्णनं षष्ठे परिच्छेदे विहितं वर्तते । दिङ्मात्रं यथा– **अन्यत्र भोगपूजायां स्मरेत् पद्मासनादिना । (६.२०)**

अत्रैव पूजासमाप्तौ – **चेतसा भक्तियुक्तेन निवेद्य तदनन्तरम् । (६.२५)**

इत्यत्र चेतः भक्तियुक्तं भवेतादृशेनैव चेतसा पूजासमर्पणं कार्यमिति ।

तत्रैव पूजायां प्रतिसरदानप्रसङ्गे – **विभाव्यालङ्कृतं भक्त्या ।(६.५)**

तथा च – **समालभ्य सुगन्धेन भक्तितश्चन्दनादिना । (६.५१)**

इत्याभ्यां पङ्क्तिभ्यां भक्तेरावश्यकता प्रादर्शि ।

वन्दनभक्तेःविवरणं तु – **अष्टाङ्गेन नमस्कृत्य । (६.१८९)**

इत्यत्र सुस्पष्टं भणितम् वर्तते ।

तत्र मुमुक्षुभिरनुष्ठेये व्रतविधानेऽपि विशेषः नियमसङ्ग्रहः प्रोक्तः तत्र भक्तिपूर्वकं सर्वाः क्रियाः स्मरणं कीर्तनञ्च नूनं कर्तव्ये इत्युपदिष्टम् । यथा –

भक्तिपूर्वात् तु कैवल्यात् । ७.३७

तथा च – **स्मरन् देवमिदं पठेत् ।** ७.३८

इत्युभयत्र स्मरणकीर्तनयोः प्राधान्यं प्रादर्शि ।

समन्त्रकव्रतविधिनाम्नि अष्टमे परिच्छेदे मन्त्रनिरूपणावसरे –

६.११. प्रणामं सप्रदक्षिणम् । (८.९)

तथा च – **भक्तिश्रद्धापुरःसरम् ।** (८.९)

इत्युभयत्र समन्त्रः वन्दनभक्तेः अपि प्रयोगः कर्तव्य एवेति समस्वरमुपदिष्टम् ।

स्मरणभक्तेरुल्लेखः श्रीपाञ्चरात्रसात्वतसंहितायां दिक्सङ्ख्ये परिच्छेदे सप्रमाणं सविस्तरं कृतो वर्तते । यत्र तत्तन्मन्त्रव्याप्तिस्मरणे यथा –

तस्मात् स्वाभाविकं कृत्वा बद्धं वा मानसं पुरा ।
स्वेन स्वेन तु मन्त्रेण स्मरेद् व्याप्तिं सदैव हि ॥

(१०.५३)

या या देवता वर्तते तस्याः तस्याः यः स्वीयः मन्त्रः तत्र तस्याः व्याप्तिं सदैव भक्तः स्मरेदिति ।

अत्र विभवदेवताध्यानाख्ये द्वादशे परिच्छेदे सर्वेषामपि देवानां स्मरणभक्त्यंगभूतध्यानलक्षणानि सविस्तरं अचर्चिषत । तत्र **भक्तानुग्रहकाम्यया** (१२.५) इत्यत्र एक एव भगवान् विविधानि रूपाणि दधार धारयति च इति प्रतिपाद्य हेतुं तु भक्तानुग्रहकारकमेव प्राहातः हेतुं तु भक्तभक्त्योरेव प्राधान्यं स्फुटति वाक्येनानेन ।

द्वादशे परिच्छेदे विभवदेवानां सर्वेषामपि अनन्त-मधुसूदन-विद्याधिदेव-कपिल-विश्वरूप-हंस-वराह-वडवानल-हयग्रीव-एकार्णवशायि-कूर्म-नृसिंह-श्रीपति-पारिजातानां ध्यानयोगः वर्णितः स च भक्त्युपकारकः सर्वथेति निर्णयः ।

११
आगमविमर्शः

अत्र हि बहुष्वागमग्रन्थेषु सत्सु च प्रायः सर्वत्रैकसमाननिरूपणे मयात्र नारदपाञ्चरात्रान्तर्गता संकर्षणसंहिताश्रयसरणत्वेन समाश्रीयते।

अत्र हि ज्ञानरात्र–मन्त्ररात्र–आचाररात्र–अर्चनारात्र–प्रायश्चितरात्राणीति पञ्चरात्राणि देहे पञ्च प्राणा इव जगति पञ्चतत्वानीव, पञ्च ज्ञानेन्द्रियाणीव राराजन्ते।

अत्र अष्टाध्यायत्मकं प्रथमन्तावत् ज्ञानतन्त्रम् शोभते । अस्मिन् हि अशान्तनारदबदरीगमनम्, वासुदेवदर्शनम् , सङ्कर्षणस्योपदेशः, दृश्यते प्रथमाध्याये। अपरे चाध्याये, परमतत्त्वनिरूपणं, तृतीये सर्वव्यूहानां वासुदेवरूपत्वं, षष्ठाध्याये चतुर्थस्य परमतत्त्वलीनत्वम्, द्वादशरूपाणि, षष्ठाध्याये चत्वारि पर्वाणि तत्र प्रथमे गुरणक्षोभः, अपरे महत्तत्वोत्पत्तिः, तृतीयेऽहंकारवर्णनं चतुर्थे सहर्षशीर्षकं वर्ण्यते। सप्तमाष्टमयोः मानससृष्टिप्रलयौ निरुप्येते।

अत्र विविधतन्त्रेषु भगवतः केन विधिना पूजा कर्तव्येति सविस्तृता चर्चा विहिता वर्तते।

श्रीमद्भागवते एकादशस्कन्धे जनकः करभाजनं पप्रच्छ –

कस्मिन् काले स भगवान् किंवर्णः कीदृशो नृभिः ।
नाम्ना वा केन विधिना पूज्यते तदिहोच्यताम् ॥

११/५/१९॥

तत्रोतररूपेण करभाजनः प्रत्युवाच

कृतं त्रेता द्वापरश्च कलिरित्येतेषु केशवः ।
नानावर्णाभिधाकारो नानैव विधिनेज्यते ॥११/५/२०॥

अत्र नानावर्णाभिधाकारो इति पदेन वासुदेवसङ्कर्षणप्रद्युम्न–पुरुष–अनिरुद्धः इति अनेकैः नामभिः अनेकैः स्वरूपैः इति नारदपञ्चरात्रोक्तं सङ्गच्छते यथा –

शङ्खचक्रधरं विष्णुमानन्दस्यन्दनिर्भरम् ।
सङ्कर्षणानिरुद्धादिव्यूहयुक्तं महाप्रभुम् ॥

सं. सं. १/१३॥

नानातन्त्रविधानेन नाम ज्ञानतन्त्रेण, मन्त्ररात्रेण, आचाररात्रेण, अर्चनरात्रेण, प्रायश्चिरात्रेण च भक्ता तं परमपुरुषमाराधयन्ति इत्यपि श्रीमद्भागवतपाञ्चरात्रयोः समश्वरः सुघोषः दृश्यते।

इत्थमत्र यानि पञ्च रात्राणि सन्ति तेषां नानातन्त्रविधानेन च नानावर्णाभिधाकारो इत्युभयोः सामञ्जस्यं सर्वथा सूपपाद्यमेव।

आचाररात्रे भक्त्युपकारकाणि तत्त्वानि

संकर्षणसंहितायाः आचाररात्रे नारदोऽप्राक्षीत् सङ्कर्षणं –

तदाख्याहि परात्मन् मां येन निश्चिन्तमानसाः।
भुवि तावकीनान्मन्त्रान् जप्त्वा सिद्धिमवाप्नुयुः॥

(सं.सं.आ.१/५)

येन भक्ताः अचलमानसाः सन्तः त्वदीयान् मन्त्रान् जपन्तः सिद्धाः स्युरित्याख्याहि तदा सङ्कर्षणोऽचकथत् जापकस्य सदाचारः हेतुस्तत्रापि नारद।

निषिद्धाचरणत्वाद्वा वैधाऽनाचरणत्वतः॥ (सं.सं.आ.१/७)

अत्र सात्त्विकोपासनायाः फलं पिपादयिषुः पातकी साधकः फलं नाप्नुयादपि च तन्त्रैः सदाचार एव धर्मः प्रोक्तः पाञ्चरात्रविशारदैः अपि च

तस्मात्सर्वप्रयत्नेन सदाचारी भवेन्नरः।
मन्त्रं मन्त्रार्थयुक्तञ्च फलं प्राप्नोति संयतः॥

(सं.स.आ.१/१९)

इत्यनेन सदाचारस्य सर्वश्रेष्ठत्वं निजगाद।

अयञ्च सदाचारः सामान्यविशेषभेदेन द्विधा तत्र विभक्तः। साधारणः तत्र सर्वेषां वैष्णवानां सामान्यः अस्मिन् सदाचारे –

वासुदेवे पराभक्तिः श्रद्धाऽऽस्तिक्यञ्च सेवनम्। (सं.स.आ. १/१४)

वासुदेवनारायणे पराभक्तिः सर्वेषां जीवानां प्रोक्ता तस्याः उपकारकतत्त्वानि च श्रद्धा, आस्तिक्यम्, वासुपराः ज्ञान-गति-चिन्ता-क्रियाः, अनन्यभावना सन्ति।

पुनरयं सदाचारः आभ्यन्त्रबाह्यभेदेन द्विधा व्यभाजि, तत्राद्यः ज्ञानेन्द्रियैः मनसा ज्ञेयः, तत्रोपकारकाणि तत्त्वानि सन्ति – सौम्यता, मृदुता, मैत्री, कारुण्यम्, कृतज्ञता, तितिक्षा, उपकारिता, धृतिः, श्रद्धा एतानि हि मानसाचारभूतानि।

ततः पञ्चभिः पद्यैः श्रद्धायाः माहात्म्यं निगदितं –

श्रद्धावान् लभते .... ।

श्रद्धया वासुदेवस्य प्रसादः स्यादसंशयम् ॥

(सं.स.आ. १/२१ तः २५)

एवं श्रद्धाप्रसन्नते मुख्यगुणरूपेण वर्णिते ।

बाह्याचारोऽपि भक्त्युपकारकः अतः सोऽपि मुमुक्षुभिः अवश्यमेव परिपालनीयः तत्र त्याज्यांशाः - परापवादः, पैशुन्यम्, अनृतम्, अन्योद्वेगकरभाषणम्, परनिन्दा च ।

भगवतः कथावार्तासु भक्ताः सदा रताः स्युरतः प्रोक्तञ्चत् —

सत्यं प्रियं हितं वाच्यं गुणवार्तासु सर्वदा ।

धर्मवार्तासु सर्वासु पाञ्चरात्रविदा सदा ॥ (सं.सं.आ. १/३१)

एवं साधारणानुक्त्वा विशेषानाह ते च वर्ण-क्कुल-देश-आश्रमभेदैः चत्वारः सन्ति तथा आचरणेन भक्तेरूपकारकाः भवन्त्येते ।

वर्णकुलाच्च देशाच्चाश्रमात् सन्ति पृथक् पृथक् ॥ (सं.सं.आ. १/३६)

अत्र एते सर्वेऽपि आचाराः यदि हरिभक्तौ प्रतिकूलास्स्युस्तर्हि त्याज्याः परं अनुकूलाः ग्राह्या एव यथा -

हरिभक्तानुकूलो न त्याज्यः स कथञ्चन ॥ सं.सं.आ १/४३

एवमत्र भक्तौ आचारस्य सर्वथा सर्वरूपेण उपकारकत्वं प्राकाशि ।

श्रीमद्भागवते एकादशस्कन्धे त्रयोदशाध्याये भक्तौ सात्विकोपासनायाः महत्त्वमुररीकृत्य प्रोक्तञ्चत् —

सत्त्वाद् धर्मो भवेद् वृद्धात् पुंसो भद्भक्तिलक्षणः ।

सात्त्विकोपासया सत्त्वं ततो धर्मः प्रवर्तते ॥ ११/१३/२

अत्र हंसगीताध्यायेऽस्मिन् मम भक्तिलक्षणः धर्मः कथं वद्र्धते? इत्यस्योत्तरं विद्यते । भक्तः सत्त्वेन अन्यतमौ हत्वा सात्त्विकया उपासनया सत्त्वस्याभिवृद्धिं विदध्यात् ।

अत्राऽपि राजस्तभोभ्यां समुद्भवः अधर्मः उभये हते स्वयं प्रणष्टो भवति । कारणानि चात्र अदर्शिषत आगमः, अर्थः, प्रजाः, देशः, कालः, कर्म, जन्म, ध्यानम्, मन्त्रः, संस्कारः एतानि दश ।

अत्रे च सात्त्विकसेवनमेव वरमिति आह —

सात्त्विकान्येव सेवेत पुमान्सत्त्वविवृद्धये ॥ (११/१३/६)

इत्थमुभयत्र भक्तौ सात्त्विकोपासनायाः महत्त्वं दृश्यते ।

१२. भक्तिमार्गे दीक्षाविधानावश्यकता

सङ्कर्षणसंहितायाम् आचाररात्रस्य द्वितीयेऽध्याये नारदः सङ्कर्षणं भक्ताः मोहान्धकारं छित्त्वा कथं मोक्षभाजः स्युरिति पप्रच्छ तदा –

योग्यं गुरुं प्रपद्यात्र दीक्षयित्वाथ नारद ।
भक्तिं श्रीवासुदेवस्य प्राप्नोति स तु कर्मकृत् ॥

(सं.सं.आ. २/७)

भक्तिमार्गेऽपि योग्यगुरोरावश्यकता वर्ततेऽतः यथा प्रह्लादध्रुवयोः नारदरूपयोग्यगुरोः प्राप्तया योग्यया दीक्षया भक्त्या च नारायणलब्धिरजायतं तथैव प्रत्येकस्यापि जीवस्य दीक्षाविधानमत्यन्तमावश्यकं वर्तते ।

दीक्षाविधानं किमर्थमिति चेत् –

आचारान्गुरुतो ज्ञात्वा वर्तते तत्परः शुचिः ।
स एव सुखमाप्नोति नान्ये सांसारिकाः द्विजाः ॥

(सं.सं.आ.२/८)

अत्र भक्तिः कथङ्कर्तव्या? तर्हि गुरोः भक्तिमार्गस्य आचारान्सम्यग् ज्ञात्वा गुरोरनुकरणशीलस्सन् पूतो भूत्वा भक्तिं कुर्यात्तदैव तस्य भक्तिसुखं नारायणसुखमवाप्येताम्, अन्ये संसारभावभाजः न सुखिनो भवन्ति ।

का नाम दीक्षा? कथं साप्तव्या? केनाप्तव्या? इति प्रश्नत्रयमत्र वर्तते, तेषाञ्च समाधानमत्रैवं वर्तते ।

१३. दीक्षालक्षणम् –

दीयते विमलं ज्ञानं दिव्यभावं परमात्मनि ।
क्षीयते पापसन्तानं सा दीक्षा तन्त्रसम्मता ॥

(सं.सं.आ.२/८)

वर्णद्वयात्मकोऽयं शब्दः, विमलज्ञानदातृत्वं, परमात्मनि भगवति दिव्यपरमप्रेमभावदातृत्वं, दीकारसूचकं, क्षकारसूचकञ्च पापसन्ततिक्षयकारकमिति । सैव दीक्षा कथ्यते ।

अदीक्षितानां सर्वकर्मवैफल्यमाह–

अदीक्षितास्तु कुर्वन्ति जपपूजादिकाः क्रियाः ।
न भवन्ति श्रियै तेषां शिलायामुप्तबीजवत् ॥

(सं.सं.आ.२/१८)

यथा शिलायां बीजवपनं निष्फलं तथैव अदीक्षितानां सर्वाः क्रियाः निष्फलाः भवन्तीति।

दीक्षाभेदाः :- इयञ्च दीक्षा त्रिविधा वर्तते यथा –

दीक्षा सा त्रिविधा प्रोक्ता वैभवीव्यूहरूपिणी ।
ब्रह्माख्या चैव दीक्षोक्ता शरणागतवत्सला ॥

(सं.सं.आ.२/२०)

अत्र वैभवी व्यूहरूपिणी ब्राह्मणी इति नाम्नी सा त्रिधा तत्राधा भोगदा, अपरा भोगमोक्षदा, तृतीया च अपुनर्भवलक्षणा भक्तग्राह्या वर्तते।

६.१४. आचार्यलक्षणम् :-

भक्तिमार्गे आचार्यस्य योग्यमार्गदर्शकस्य किं स्वरूपमिति व्याचिख्यासुराह –

ब्राह्मण्यां ब्राह्मणाज्जातः सत्यभाषी प्रियंवदः ।
विषयेषु यो निःस्पृहः सत्कर्मनिरतः शुचिः ॥

(सं.सं.आ.२/२६)

इत्याद्येन पद्येन पञ्चाशल्लक्षणवान् दशनिषिद्धगुणः आचार्यः इति प्रतिपादितम्। अत्र भगवति भक्तिमान् भागवतः गुरुरेव वरीयानिति चान्ते निर्णयः।

द्वितीयाध्याये दीक्षाचार्यलक्षणं प्रतिपाद्य तृतीयेऽध्याये शिष्यलक्षणान्यूचे –

कृतज्ञश्च प्रसन्नात्मा श्रौतस्मार्तक्रियापरः ।
मातुः पितुश्च शुश्रूषुः स्थिरबुद्धिरतन्द्रितः ॥

(सं.सं.आ.३/४)

कृतज्ञ इत्यारभ्य निर्वाणवाञ्छुरिति त्रिंशल्लक्षणानि शिष्यस्य जिज्ञासोरत्र निगदितानि।

१५. दिक्षितफलम् :-

इत्थं यः भक्तः शास्त्रविधिविधानेन दीक्षितः भवति स एव परमं धामाप्नोति तदुक्तम् –

ब्रह्मदीक्ष्यस्तथाप्नोति देहान्ते निश्चयात्खलु ।
ब्रह्माधाम सुखारामं न स आवर्तते पुनः ॥

(सं.सं.आ.६/९६)

एवमत्र ब्रह्मदीक्षावतः भक्तस्य शरीरपाते सुखागारभूतं ब्रह्मणः धाम प्राप्तं भवति यद्गत्वा न तस्य इह पुनरावर्तनञ्जायते –

श्रीमद्भागवते चैकादशस्कन्धे प्राणाख्येऽध्याये दीक्षायाः गुरोश्च महत्त्वं प्रत्यपादि महर्षिणा व्यासेन यथा –

यमानभीक्ष्णं सेवेत नियमान् मत्परः क्वचित् ।
मदभिज्ञं गुरुं शान्तं उपासीत महात्मकम् ॥

(१०/१०/५)

अत्र भगवत्परायणात् मदात्मकात् शान्तात् गुरोः दीक्षा ग्राह्येति पाञ्चरात्रसाम्यं लभ्यते । गुरुदीक्षितः एव भक्तः शान्तिमाप्नोति उक्तञ्च तत्र –

वैशारदी सातिविशुद्धबुद्धिः धुनोति मायां गुणसमप्रसूताम् ।
गुणांश्च सन्दह्य यदात्ममेतत् स्वयं च शाम्यत्यसमिद् यथाग्निः ॥

(११/१०/१३)

दीक्षितः शिष्यः भक्तो वा अत्यन्तं शुद्धां शेमुर्षी लभते तदा च गुणोत्पन्नां मायां दूरीकृत्य सः स्वयं परमात्मनि पराभक्तियुक्तो भवति ।

शिष्यस्याचार्यशुश्रूषाफलमपि भागवते श्रीव्यासेन न्यगादि –

एवं गुरूपासनयैकभक्त्या विद्याकुठारेण शितेन धीरः ।
विवृश्च्य जीवाशयमप्रमत्तः सम्पद्य चात्मानमथ त्यजास्त्रम् ॥

(११/१२/२४)

अत्रापि दीक्षादातुः गुरोः परया भक्त्यैव शिष्यः ज्ञानेन अप्रमत्तः सन् परया भक्त्या परमात्मनं लभत इति स्फुटीचकार व्यासः ।

एवमत्रोभयोः दीक्षासंस्कारस्यावश्यकता भक्तिमार्गे भगवतः प्राप्त्यर्थं परमुपयोगिनी इति फलति ।

१६. भगवत्स्वरूपम् –

सङ्कर्षणसंहितायाः प्रथमे ज्ञानरात्रे नारदः क्षीणपुण्यानां पुनः संसारप्राप्तिः, तन्निवारणाय अपुनर्भवाय भक्तानां बदरीशमप्राक्षीत्, तदा बदरीशः तं श्वेतद्वीपगमनायादिदेश तत्र च भगवत्स्वरूपं कीदृशमिति विलोक्य इत्यादिदेश –

श्वेतद्वीपे महाधाम्नि यत्र वासुदेवो हरिः । (सं.सं. १/२०)

तत्र कीदृशः वासुदेवः किं स्वरूपः इति वर्णयन्नाह बदरीशः –

श्रिया चरणया जुष्टं श्यामलं पीतवाससम् ।
सङ्कर्षणादिभिर्युक्तं कौस्तुभोज्ज्वलवक्षसम् ॥ २४

प्रद्युम्नानिरुद्धाभिः युतः कौस्तुभमालाधारी, कमलनयनः, श्रीवत्सलाञ्छनः प्रसन्नयशाः वर्तत इति तत्स्वरूपं निरुपितम्।

अग्रे च न्यरूपि –

शङ्खचक्रधरं विष्णुमानन्दस्यन्दनिर्भरम् ।
सङ्कर्षणानिरुद्धादिव्यूहयुक्तं महाप्रभुम् ॥ ३७
वासुदेवं ददर्शासौ हरिं सर्वाङ्गसुन्दरम् ॥

(सं.सं.आ.१/३७-३८)

अत्र भगवत्स्वरूपं शङ्खचक्रयुक्तं, आनन्दपरिपूर्णम्, सङ्कर्षादि व्यूहसमेतम्, सर्वाङ्गसुन्दरमिति न्यरूपि। अग्रे द्वितीयाध्याये पुनः-

षाड्गुण्यविग्रहम् । (सं.सं.आ.२/१६)

इत्यत्र परमात्मस्वरूपं षण्णां गुणानां विग्रहमिति प्रतिपादितम्।

पुनः तस्य त्रैविध्यमपि सूचितं तत्र - परव्यूहवैभवभेदेन सः एक एव चतुर्व्यूहं धृत्वा चतुरत्वमाप - तत्र लक्ष्मीनारायणः वैकुण्ठाख्ये राजते –

लक्ष्मीनारायणाख्येन प्रथितं युगलं त्विदम् ।
राजते शाश्वतं द्वन्द्वं वैकुण्ठाख्ये परे पदे ॥

(सं.सं.आ.३/४३)

ततश्चः, सङ्कर्षणः, तस्मात् प्रद्युम्नः, तस्मादनिरुद्धः इत्थं वासुदेवस्य व्यक्तीभावं गताः व्यूहस्थाः वासुदेवाद्याः परमात्मनः स्वरूपाः सन्ति।

श्रीमद्भागवते चैकादशे स्कन्धे ध्येयस्य परमात्मनः स्वरूपं वर्णितं यथा –

समं प्रशान्तं सुमुखं दीर्घचारुचतुर्भुजम् ।
सुचारुसुन्दरग्रीवं सुकपोलं शुचिस्मितम् ॥ ३८॥

इत्यारभ्य –

सर्वाङ्गसुन्दरं हृद्यं प्रसादसुमुखेक्षणम् ।
सुकुमारमभिध्यायेत् सर्वाङ्गेषु मनो दधत् ॥ (११/१४/४१)

श्रीवासुदेवः प्रशान्तः सुन्दराननः, चतुर्भुजः, सुन्दरः, मनोहरकण्ठः, सुन्दरकपोलः, पवित्रहासः, कर्णाभूषणधारी, सुवर्णसमानपीताम्बरधारी, घनश्यामः, श्रीवत्सलाञ्छनः,

शङ्खचक्रगदापद्मवनमालाभिः विभूषितः, नूपुरचरणः, सकौस्तुभमालः, सर्वाङ्गरमणीयः, सर्वमनोहारी, प्रसन्नाननः वर्णितः वर्तते।

भक्तिमार्गे भगवत्स्वरूपस्मरणध्यानादीनां परमुपकारकत्वं आचार्यैः प्राकाशि तस्मादुभवयत्र परमात्मनः श्रीविग्रहस्य दिव्यता भव्यता प्रतिपादिता, या भक्तस्य हृदये अलौकिकां प्रीतिं जनयति।

१७. अर्चनभक्ते प्राधान्यम् :-

श्रीसङ्कर्षणसंहितायां चतुर्थे अर्चनरात्रे पराभक्त्युपकारकत्वात् अर्चनभक्तेः सविस्तरं साङ्गोपाङ्गं वर्णनं विहितं वर्तते तृतीयाध्याये –

पूजां तेषां प्रवक्ष्यामि कामभेदेन पूजयेत् ।
तस्यापि परिवारांश्च तन्त्रोक्तान् कल्पयेत्तथा ॥ (सं.सं.आ.३/११)

तत्र पुनः प्रतितिथिं कथं पूजनमित्यपि वर्णितं, प्रतिपदि किरीटमित्यादिभिः वाक्यैः तत्र रक्तचन्दनरक्तपुष्परक्तवस्त्रैः पूजनं तेन दारिद्र्यनाशः ।

दितीयायां त्रिशिखं, तृतीयायामनन्तम्, चतुर्थ्यां गणाधीशम्, एतेषां पूजनेन विष्णोः दासभक्तः समर्चकः भवति उक्तञ्च –

दासभक्तिर्भवेद्विष्णौ पूजनादस्य नारद ।
भक्त्या प्रसन्नता तस्य शाश्वतं सुखमाप्नुयात् ॥ (सं.सं.अ ३/३१)

पञ्चम्यां श्रियम्, षष्ठ्यां वासुदेवपद्मम्, सप्तम्यां कौस्तुभम्, अष्टम्यां चक्रम्, नवम्यां वनमालाम्, दशम्यां शङ्खम्, एकादश्यां मासाधिपानाम्, द्वादश्यां वासुदेवम्, त्रयोदश्यां गरुडम्, चतुर्दश्यां शेषम्, पौर्णमास्यां भृगुलाञ्छनमेवं एतेषां तिथ्यनुसारं पूजनं विधेयम्।

इत्थमत्र विविधपुष्पचन्दनवस्त्रधूपादिभिः षोडशोपचारपूजा विधेया । फलञ्चोक्तम् –

वासुदेवप्रसादेन तत्परिवारेसवया ।
आप्नोति पूजकः स्वर्ग्यमिहैव फलमक्षयम् ॥
(सं.सं.अ ३/३१)

श्रीमद्भागवते चैकादशस्कन्धे एकोनविंशोऽध्याये स्वयं भगवतार्चनमाहात्म्यं प्राकाशि- **परिनिष्ठा च पूजायाम् ॥** ११/१९/२०

अत्र भगवता भक्तेः कारणानि प्रतिपाद्यन्ते, तत्र कथा, अनुकीर्तनम्, स्तवनम्, वन्दनम्, मद्गुणेरणम्, मदर्थेऽर्थपरित्यागो, एतैः मयि अनन्या भक्तिः सञ्जायते –

मयि सञ्जायते भक्तिः कोऽन्योऽर्थोऽस्यावशिष्यते ॥ ११/१९/२४

इत्यत्र परिनिष्ठा च पूजायाम्, आदरः परिचर्यायाम्, इत्युभयत्र भक्तेः अर्चनसेवयोः महदुपकर्तृत्वं प्रत्यपादि भगवता।

एवमत्र उभयोः अर्चनभक्तिप्राधान्यं समस्वरं विराजते इति।

१८. प्रतिमाभेदाः तन्निर्माणञ्च -

सङ्कर्षणसंहितायां अर्चनरात्रे तुरीये प्राणाख्येऽध्याये नारदर्षिः सङ्कर्षणं पप्रच्छ —

लक्षणानि प्रकाराणि क्षेत्रबिम्बादिकस्य च ।
कानि कियत्प्रमाणानि तत्सर्वं वद विस्तरात् ॥

(सं.सं.अ.५/२)

एकायनाः यामेकान्तिकीं अनुष्ठाक्रियां व्यदधुः, तदा च आराध्य विश्वेशं विज्ञाय फलमवापुः, तां प्रतिपादयतु। तत्र सङ्कर्षणः प्राह —

बिम्बं बहुविधं तन्त्रे वर्णितं द्विजपुङ्गव ।
चित्ररूपञ्च मद्रूपं काष्ठशैलोद्भवं तथा ॥६॥
आयसञ्चेति विज्ञेयं भेदभिन्नं तु वर्णशः ।
तत्र चित्रमयं विद्धि चतुर्धा चाम्बरोत्थितम् ॥७॥
कार्पासकञ्च कौशेयं क्षौमशाणमयन्तथा ।
द्विजक्षत्रियवैश्यानां शूद्राणां तदनुक्रमात् ॥

(सं.सं.अ ५/८)

हे नारद! तन्त्रशास्त्रे प्रतिभाः नैकविधाः सन्ति। तत्र चित्रप्रतिमा, काष्ठप्रतिमा, पाषाणमूर्तिः, लोहमूर्तिः अत्र वर्णशः भेदाः सन्ति। तत्र चित्रमयी मूर्तिः चतुर्धा सम्भवति यथा कार्पास-कौशेय-क्षौभ-शाणमयी मूर्तिः। अत्र वर्णक्रमानुसारेण सा सा मूर्तिः ग्राह्या।

निर्माणम् :-

सर्वासामपि मूर्तीनां रचनाप्रकारः भिद्यते यथा मृत्तिकामूर्तिनिर्माणे —

खनित्वा मृत्तिकां स्वल्पां बिम्बाधारात्तु नारद ।
उक्तदोषविमुक्तां तां पञ्चगव्येन साम्भसा ॥

(सं.सं.अ. ५/२६)

अत्र शुद्ध्याः भूमेः सङ्गमाद्वा मृत्तिकां खनित्वा चर्म-अस्थि-केशादिदोषरहितां गोमूत्र-गोमय-क्षीर-दधि-चन्दनादिभिः जलेन च तां संशोध्य ततः तया मृत्तिकया शुद्ध्या मूर्तिनिर्माणं कर्तव्यमिति।

श्रीमद्भागवते चैकादशस्कन्धे सप्तविंशेऽध्याये उद्धवः भगवन्तं श्रीकृष्णमप्राक्षीत् —

क्रियायोगं समाचक्ष्व भवदाराधनं परम् ।
यस्मात्त्वां ये यथार्चन्ति सात्त्वताः सात्वतर्षभ ॥

(११/२७/७)

इत्यनेन अर्चनविधेः वैदिकतान्त्रिकमिश्रभेदेन त्रिप्रकारकत्वमुररीकृत्य मे पूजा कर्तव्येति उपदिदेश।

१८. मूर्तिभेदाः -

तत्रैवार्चनं कुत्र कर्तव्यमिति प्रश्ने समादधौ श्रीकृष्णः उद्धवाय-

शैली दारुमयी लौही लेप्या लेख्या च सैकती ।
मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता ॥

(११/२७/१२)

इत्यत्र प्रतिमायाः शैल्यादिभेदेन अष्टविधत्वं स्वीकृत्य तत्रार्चनं प्रोक्तम्।

प्रतिष्ठा :-

तस्याः प्रतिमायाः चैतन्यसंपादिका प्रतिष्ठा कार्या उक्तञ्च -

चलाचलेति द्विविधा प्रतिष्ठा जीवमन्दिरम् ।
उद्वासावाहने न स्तः स्थिरायामुद्धवार्चने ॥

११/२७/१३

इत्यत्र चलाचलेति भेदेन प्रतिष्ठा द्वेधा व्यभाजि च तत्र अचलायां मूर्तौ न आवाहनविसर्जने भवत इत्युक्तम्।

अर्चनम् :-

तस्याः प्रतिमायाः प्रतिष्ठां विधाप्य तत्रार्चनं विधेयम्। तच्च यथालब्धैः द्रव्यैः भावपूर्वकं राजोपचारम्, त्रिंशोपचारम्, षोडशोपचारम्, पञ्चोपचारम्, मानसोपचारं वा कर्तव्यम्।

तत्र पूजने भगवता सह केषां पूजनं तत्राह —

सुदर्शनं पाञ्चजन्यं गदासीषुधनुर्हलान् ।
मुसलं कौस्तुभं मालां श्रीवत्सं चानुपूजयेत् ॥

(११/२७/२७)

इत्यत्र भगवदाभूषणायुधादीनामपि सुदर्शनादीनां पूजा करणीया।
इत्थं वैदिकतान्त्रिकैः मामर्चन् भक्तः मनोऽभीष्टां कामनां लभते।
एवं नारदपाञ्चरात्रश्रीमद्भागवतयोः सामञ्जस्यं सूपपादमेव सिद्ध्यति।

१९. तन्त्रराद्धान्ताः तत्र व्यूहनिरूपणञ्च –

सङ्कर्षणसंहितायाः ज्ञानरात्रे शिवनेत्राख्येऽध्याये तन्त्रराद्धान्ताः व्यूहभेदाश्च नारदप्रश्ने सङ्कर्षणेन न्यरूपिषत। नारदः पप्रच्छ :-

त्रिविधं कथितं ब्रह्म परं व्यूहञ्च वैभवम्।
कार्यकारणभावस्तु तेषां सम्भवति कथम्॥

(सं.सं.अ. ३/१)

इत्थं पृष्ट्वा तस्य त्रिविधस्य एकत्वं कथमुपपद्यते च व्यूहाख्यं ब्रह्म कथं ज्ञातव्यम्। तत्रोत्ररूपेण सङ्कर्षणः प्राह यत् –

प्रकाशनात्त्वयन्तृत्वाद् आधारात् परब्रह्मणः।
व्यूहादौ कार्यभावाख्या प्रक्रिया प्रतिपाद्यते॥

(सं.सं.अ. ३/१०)

एवं निरूप्य परात्परः देवः वासुदेव एक एव जगद्गुरुः। एतस्य व्यूहे सर्वाधिकं तेजः सामर्थ्यञ्च दृश्यते। विभवे ततः न्यूनम्, जीवेषु ततः न्यूनम्, परं वासुदेवः सदा सर्वदा पूर्णतया अवतिष्ठते।

तदेव चातुरात्म्यं व्यूहाख्यं प्रितपद्यते तत्राद्यं भगवद्रूपं लक्ष्मीनारायणपरम्, ततः सङ्कर्षणोऽहं जनिं लेभे, मत्तश्च प्रद्युम्नः:, तस्मादनिरुद्धः इत्थमत्र व्यूहवर्णनं सम्प्राप्यते।

अहमेव रुद्राख्येन प्रलयकार्यकर्तास्मि एते सर्वेऽपि शुद्धचिदात्मकाः देवाः न प्राकृताः।

राद्धान्ताः :-

केशवः वासुदेवो पश्चिमगे वामे चक्रं सव्ये शङ्खं दक्षिणे मुख्यकरे शङ्खं अपरे कौमोदकीं धत्ते। नारायणः सव्यापसव्ये शङ्खगदे पश्चिमे कञ्जचक्रे, धारयति। गोविन्दः मुख्यकरे कञ्जम् दक्षिणे गदाम्, शङ्खचक्रे पश्चिमे धारयति। विष्णुः सव्यापसव्याभ्यां शङ्खपङ्कजे, पश्चिमहस्ताभ्यां चक्रकौमोदकीगदाः दधाति। मधुसूदनः मुख्यकरे पद्मम् पश्चिमतः सव्ये गदाम्, दक्षिणतः सव्ये चक्रम्, दधाति।

द्वितीयचातुरात्म्ये प्रद्युम्नमुख्याः सन्ति। तत्र प्रद्युम्नस्य अग्रतः वामकरे चक्रम् अन्यत्र गदाम् पश्चिमे सव्ये पद्मम्, तदपरे शङ्खम् भवति। त्रिविक्रमस्य वामनस्य अग्रवामहस्ते गदा, मुख्ये दक्षिणे करे चक्रम्, पश्चिमे वामे कञ्जम्, तदपरे करे ध्वनिः धृता भवति। श्रीधरः मुख्यहस्ते वामे गदाम्, अपसव्याख्ये चक्रम्, वामपश्चिमे शङ्खम्, अपरस्मिन् पदमचक्रे समादधाति।

एवमत्र भगवतः विविधानि स्वरूपाणि, तेषामायुधानि च वर्णितानि।

श्रीमद्भागवते द्वादशे स्कन्धे एकादशाध्याये तन्त्रराद्धान्तानुसारं परिचर्या च अङ्गोपाङ्गायुधकल्पानि शौनकसूतयोः संवादे वर्णितानि सन्ति यथा –

तान्त्रिकाः परिचर्यायां केवलस्य श्रियः पतेः ।
अङ्गोपाङ्गायुधाकल्पं कल्पयन्ति यथैव हि ॥

१२/११/२

शौनकः कथयामास सूतं प्रति हे सूत महाराज ! समस्ततन्त्रराद्धान्ते भवानेव निपुणस्तेन मे तत्सर्वं वर्णयतु। तदा सूतः प्राह –

नमस्कृत्य गुरून् वक्ष्ये विभूतीर्वैष्णवीरपि ।
याः प्रोक्ताः वेदतन्त्राभ्यां आचार्यैः पद्मजादिभिः ॥

१२/११/४

इत्यनेन पद्येन स्वगुरुन् नत्वा वैष्णवविभूतिः ब्रह्मादिभिः वर्णिताः वेदतन्त्राभ्यां प्रोक्तास्तेऽहं वर्णयामि।

भगवतो पौरुषं रूपं तत्र भूः पादौ, द्यौः शिरः, नभः, नाभिः इत्यादिभिः महापुरुषस्वरूपं प्रतिपाद्य सः भगवान् वासुदेवः कौस्तुभव्यपदेशेन स्वात्मज्योतिः धारयति, प्रभाव्यापकं श्रीवत्समुरसा,वनमालाख्यां स्वमायाम्, वासश्छन्दोमयं पीतम्। ब्रह्मसूत्रं त्रिवृत् स्वरम्, साङ्ख्ययोगौ मकरकुण्डले दधाति इत्थं पौरुषं रूपं भगवतो वर्णितम्।

आयुधानाञ्च तत्त्वानि वर्णयन्नाह –

ओजः सहोबलयुतं मुख्यं तत्त्वं गदां दधत् ।
अपां तत्त्वं दरवरं तेजस्तत्त्वं सुदर्शनम् ॥

१२/११/१४

भगवान् ओजस्स्वरूपिणीं गदाम्, अप्तत्त्वं दरवरम् तेजस्तत्त्वं सुदर्शनम् कालरूपं धनुः शार्ङ्गम् धारयतीति निरूपितम्।

मूर्तिव्यूहनिरूपणञ्च तत्रैव –

वासुदेवः सङ्कर्षणः प्रद्युम्नः पुरुषः स्वयम् ।
अनिरुद्ध इति ब्रह्ममूर्तिर्व्यूहोऽभिधीयते ॥

१२/११/२१

इत्यत्र भगवतो चतुर्व्यूहः प्रादर्शि।

आयुधानां वर्णनमपि पाञ्चरात्रीयं वर्णितं प्रतिभाति –

अङ्गोपाङ्गायुधाकल्पैः भगवांस्तच्चतुष्टयम् ।
बिभर्ति स्म चतुर्मूर्तिः भगवान् हरिरीश्वरः ॥

१२/११/२३

एवमुभयत्र व्यूहवर्णनं समानं वर्तते। केवलं भागवते सूर्यात्मनो हरेः व्यूहोऽधिकः प्रदर्शितः।

६.२०. विभवविस्तरः :-

श्रीसङ्कर्षणसंहितायाः ज्ञानरात्रे चतुर्थाध्याये विभवविस्तरज्ञातुकामस्सन् नारदः सङ्कर्षणं प्राह-

इदानीं श्रोतुमिच्छामि विस्तारो विभवस्य वै ।
लक्षणं तत्स्वरूपञ्च वैविध्यञ्च महामते ॥

(सं.सं.अ. ४/२)

तदा सङ्कर्षणः तत्प्रत्युत्तररूपेण विभवस्य विस्तरं कथयामास। विभवविस्तरादौ चतुर्विधः तस्मिन्नपि तुर्यसुषुप्ति-स्वप्नजाग्रतभेदेन चतुर्विधत्वम्।

तुर्यं परं ज्ञेयं यत्र सङ्कर्षणादिकं लीनञ्जायते। सुषुप्त्याख्ये व्यूहात्मा भवति। स्वप्नाख्ये द्वादश मूर्तयः भवन्ति। जाग्रदाख्ये विशारवयूपः वासुदेवशाखाचतुष्टयं विहाय स्थितः। पद्मनाभादयः एकोनचत्वारिंशन्मूर्तयः विभवविस्तरूपाः जायन्ते यथा -

पद्मनाभो ध्रुवोऽनन्तः शक्त्यात्मा मधुसूदनः ।
विद्याधिदेवः कपिलः विश्वरूपो विहङ्गमः ॥१४॥
क्रीडात्मा वडवावक्त्रो धर्मो वात्रीश्वरस्तथा ।
एकार्णवान्तः शायी च भगवान् कमठेश्वरः ॥१५।
वाराहो नरसिंहश्च पीयूषाहरणस्तथा ।
श्रीपतिर्दिव्यदेहोऽथ कान्तात्माऽमृतधारकः ॥१६॥
राहुजित् कालनेमिघ्नः पारिजातहरः शुभः ।
लोकनाथस्तु शान्तात्मा दत्तात्रेयो महाप्रभुः ॥१७॥
न्यग्रोधशायी भगवान् एकशृङ्गतनुस्तथा ।
देवो वामनदेहस्तु एकशृङ्गतनुस्तथा ॥१८॥
नरो नारायणश्चैव हरिः कृष्णस्थैव च ।
ज्वलत्परशुधृग् रामो रामश्चान्यो धनुर्धरः ॥१९॥

वेदविद् भगवान्कल्की पातालशयनः प्रभुः ।
विभवा वर्णिताः मुख्याः शेषं तन्त्राद् विजानिहि ॥२०॥

सं.सं.अ. ५/२६

एवमत्र भगवतः विभवविस्तरः वर्णितः वर्तते । विभववर्णनमवाप्यते यथा – उद्धवो भगवन्तमेव साक्षादप्राक्षीत् –

येषु येषु भावेषु भक्त्या त्वां परमर्षयः ।
उपासीनाः प्रपद्यन्ते संसिद्धिं तद्वदस्व मे

॥११/१६/३

तदा श्रीकृष्णो कथयामास यदयं प्रश्नोऽर्जुनेनाप्राक्षि तदुत्तरमहं प्रादाम् तदेव ते वदामि ।

अहं गतिमतां गतिः, कलयतां कालः, महतां महान्, दुर्जयानां मनः, वेदानां हिरण्यगर्भः, मन्त्राणां प्रणवः, अक्षराणामकारः, छन्दसां पदानि देवानामिन्द्रः, आदित्यानां विष्णुः, रुद्राणां नीललोहितः, ब्रहमर्षीणां भृगुः, राजर्षीणां मनुः, देवर्षीणां नारदः, सिद्धेश्वराणां कपिलः, प्रजापतीनां दक्षः, पितृणामर्यया, दैत्यानां प्रह्लादम्, नक्षत्रौषधीनां सोमः, ऐरावतं गजेन्द्राणाम्, उच्चैश्रवास्तुरङ्गाणाम्, नागेन्द्राणामनन्तः, आयुधानां धनुः, पुरोधसां वशिष्ठः, यज्ञानां ब्रह्मयज्ञः, भगवतां वासुदेवः ।

इत्थमत्र भगवतो विभवविस्तारः निरूपितः ।

अन्ते च –


एतास्ते कथिताः सर्वाः संक्षेपेण विभूतयः ।
मनोविकारा एवैते यथा वाचाभिधीयते ॥

११/१६/४१

अतः भगवतः भक्तियुक्तया शेमुष्या मनोवचःप्राणान्नियम्य सर्वं परिसमाप्तं भवति ।

एवमुभयत्र विभवविस्तरे सत्यपि विभवभेदः दृश्यते नारदपाञ्चरात्रे श्रीवासुदेवस्य सङ्कर्षणाद्याः विभवाः सविस्तरं निरूपिताः श्रीमद्भागवते च सूक्ष्मतरमारभ्य ज्ञानं तत्त्वविनिश्चय इत्यादयः विभवाः प्रितपादिताः सन्ति । परमुभयत्र श्रीवासुदेवस्यैव विभवविस्तृतिरिति नासमञ्जस्यं किमपि इति दिक् ।

ooo



Shree Somnath Sanskrit University - Veraval

Pin - 362 266, Gujarat, India. Ph. : 02876 - 244532 Fax : 244417
e-mail : sssu.veraval@gmail.com, www.shreesomnathsanskrituniversity.info